संस्कृत अकादमी ग्रन्थमाला - 129 Digitization Muthulakshmi Research Academy

प्रणयवतीचम्पूः

रचयिता
डॉ. के.सुधाकररावः

प्रधानसम्पादकः
आचार्यः के नीलकण्ठः
निदेशकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकादमी ग्रन्थमाला - 129
CC-0. Prof. Muthulakshmi Research Academy. Digitized by eGangotri

प्रणयवतीचम्पूः

प्रणेता

डा के सुधाकररावः

प्रधानसम्पादकः

आचार्य के नीलकण्ठम्

निदेशकः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् – 07

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Granthamālā 129

Praṇayavatīcampūḥ

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Praṇayavatīcampūḥ

ISBN – 978-93-80171-87-6

© Sanskrit Academy

Year : 2023
Pages : xiv+45
Copies : 100
Price : Rs 100

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Granthamālā - 129

Praṇayavatīcampūḥ

Author

Dr. K Sudhakar Rao

Chief-Editor

Prof. K. Neelakantham

Director

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Granthamālā 129

Praṇayavatīcampūḥ

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Praṇayavatīcampūḥ

ISBN – 978-93-80171-87-6

© **Sanskrit Academy**

Year : 2023
Pages : xiv+45
Copies : 100
Price : Rs 100

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

ओम् श्री गुरुभ्यो नमः

॥श्रीशङ्करभगवत्पादाः विजयन्ते॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।
नमामि भगवत्पादशङ्करं लोकशङ्करम्।।

द्वादशशताब्दस्य विविधशास्त्रग्रन्थानां प्रणेता आचार्य हेमचन्द्रसूरिः स्वकाव्यानुशासने उदलिखत् यत्, **गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः** इति। अङ्कः तथा उच्छवासः च चम्पोः अभिन्नाङ्गे स्तः इति जगाद सः । परन्तु कतिपयेषु चम्पूकाव्येषु अङ्कोच्छवासयोः अपेक्षया विभाजकत्वेन अध्यायस्य उपयोगः प्राप्यते । चम्पू रामायणादिषु तु काण्ड इत्येव दृश्यते।केषुचित् स्तबक इत्यप्युपयुक्तः। **गद्यपद्यमयं श्रव्यं सम्बन्धं बहुवर्णितम्। सालङ्कृतैः रसैः सिक्तं चम्पूकाव्यमुदाहृतम्** इत्यादिना लाक्षणिकैः विविधप्रकारं लक्षणम् उक्तम्। अर्थात् गद्यपद्यमिश्रितं, श्रव्यं, वर्णनप्रधानम्, अलङ्कारयुतम्, रससमन्वितं प्रबन्धकाव्यमेव चम्पूकाव्यत्वेन परिगण्यत इत्यवगम्यते।

गद्यपद्यमिश्रिता रचना तु वैदिककाले एव आरब्धा। संहिता-ब्राह्मण-उपनिषत्-पुराणादिषु गद्यपद्यमिश्रिता शैली अवलोक्यत इत्यतः चम्पू काव्यानाम् उत्पत्तिः वेदानां काले एवाभूदिति संस्कृतसाहित्येतिहासग्रन्थानाम् अवलोकनेनाप्यवबुध्यते।

ततश्च प्रायः 350 शताब्दीया हरिषेणकृत समुद्रगुप्तप्रशस्तिः इत्याख्यः ग्रन्थ एव लौकिक संस्कृतसाहित्ये चम्पूशैल्याः आदिमग्रन्थत्वेन परिगणितः। तदनन्तरं चतुर्थ-पञ्चमशताब्दयोश्च अनया शैल्या केचन ग्रन्थाः प्राप्यन्ते। मध्यप्रदेशराज्यस्य मन्दसोर नामके नगरे वत्सभट्टिकवेः 473 शताब्दौ मन्दशोरप्रशस्ति नामिका रचना शिलालेखे चम्पूशैल्या अङ्किता । एवमेव मौखरीवंशस्य ईशान वर्माणम् आश्रितः रविशान्त्याख्यः कविः555

In Public domain. Digitization Muthulakshmi Research Academy

शताब्दौ हरहाप्रशस्तिम् अनयैव शैल्या अरीरचत्। अपि च शिलालेखेषु बहुषु मिश्रशैल्या प्रसिध्दानां राज्ञां प्रशस्तिमकार्षुरनेके कवयः। एवम् एतादृशीं गद्यपद्यात्मिकां शैलीम् अभिलक्ष्यैव पञ्चमशतके भामहादारभ्य प्रायः सर्वे लाक्षणिकाः **गद्यपद्योभयमयं चम्पूरित्यभिधीयते** इति अस्य मिश्रकाव्यस्य चम्पू इति नाम आचख्युः।

तदनन्तरं दशमशताब्दौ त्रिविक्रमभट्टेन रचितं नलचम्पू इत्याख्यं काव्यमेव महत्त्वपूर्णं प्रथमं चम्पूकाव्यमिति इतिहासग्रन्थकाराः सप्रमाणम् उररीचक्रुः। तदारभ्यैव चम्पूकाव्यशैली प्रसिद्धिं गतेति, त्रिविक्रमभट्टानन्तरमेव चम्पूकाव्यरचनायाः वेगः अवर्धतेति च सर्वैरङ्गीकृत एव।

बृहत्यस्मिन् संस्कृतवाङ्मये चम्पूकाव्यानां सङ्ख्या अल्पैवास्ति। उपलभ्यमानेषु चम्पूकाव्येषु प्रायः अधिकानि रामायण-महाभारत-पुराणाधारितान्येव वर्तन्ते। अपि च ऐतिहासिकविषयाधारितानि, सत्पुरुषचरिताधारितानि, देवतासम्बन्धीनि, महोत्सववर्णनयुतानि, यात्राविवरणयुक्तानि काव्यान्यपि नैकानि रचितानि पाचीनैः आधुनिकैश्च कविभिः।

पूर्वम् अनया संस्कृतपरिषदा वेङ्कटाध्वरि कवेः वरदाभ्युदयतम्पूः, विगतवर्षद्वये च श्रीमता पेरुमांड्ल वेङ्कटराजकवेः श्रीराम-कृष्ण-युधिष्ठिरचरित-चम्पूः, जगन्नाथकवेः जगन्नाथचम्पूः, वेङ्कटशास्त्रिकवेः युधिष्ठिराश्वमेधचम्पूः, श्रीमतो पेरुमांड्लाचार्यकवेः श्रीवेङ्कटेशचम्पूप्रबन्धः श्रीकृष्णकवेः रघुनाथविजय-चम्पूः, श्रीनिवासविलासचम्पूः, कार्तिकोत्सवदीपिकाचम्पूः इत्यादि अष्टौ चम्पूकाव्यानि पूर्वं तेलुगुलिप्या प्रकाशितानि संस्कृतपरिषदा सम्यक् परिशील्य संशोध्य देवनागरीलिप्या मुद्रापितानि। अपि च श्रीमतो द्विभाषि सोमनाथशास्त्रिणः राजरत्नमालाचम्पूः, अज्ञातकविना विलिखिता विरूपाक्षचम्पूः इत्यादीनि मुद्रापणाय सिद्धानि विद्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

आधुनिकेऽस्मिन्नपि काले भारते नैके कवयः बहुविधानि काव्यानि विरचयन्ति। सहृदयहृदयान् रञ्जयन्ति काव्यरचनासम्प्रदायं परिरक्षन्ति। भारतदेशे दक्षिणप्रान्ते एव चम्पूकाव्यरचयितारः अधिकाः दृश्यन्ते इति संस्कृतवाङ्मयेतिहासकाराः अभिप्रयन्ति। तत्सत्यमेवेति निरूपयितुं अधुनातनेऽस्मिन्नपि काले संस्कृतकवयः चम्पूकाव्यानि निबध्नन्तीत्ययं प्रमोददायकःअंशः। संस्कृतकाव्यप्रणेतृषु आधुनिकेषु डा. के सुधाकर् राव् महाशयः अन्यतमः। बहुभाषाकोविदः नैककाव्यप्रणेता महाकविः डा. के. सुधाकर राव् महाशयः **प्रणयवतीचम्पू** इत्याख्यं काव्यं व्यरचयत्। पण्डितानामनुमोदं सङ्गृह्य इदानीं संस्कृतपरिषद् पक्षतः चम्पूकाव्यमिमं प्रकाशयामः। इतःपूर्वम् एतैः सुमधुरया सरलसंस्कृतभाषया रचितं कपोतसन्देशो नाम काव्यं मुद्रापितवन्तो वयम्। तच्च सहृदयाः पण्डिताः बहुधा प्रशशंसुः।

प्रणयवतीचम्पूकाव्यस्य कथा तु कल्पिता सुमनोहरा च। पञ्चसूल्लासेषूपनिबध्दा। रञ्जिनी-श्रीकर इत्याख्ययोः दम्पत्योः प्रणयकथाम् उपवर्णयन् गृहस्थाश्रमधर्माणां वैशिष्ट्यं पदे पदे उपास्थापयदयं महाकविः। सुमधुरैः छन्दोभिः, आह्लादकारिभिः वर्णनैः, चेतोहरैः अलङ्कारैः गुम्फितेयं प्रणयवतीकथा-चम्पूः सहृदयान् आनन्दयतीत्यत्र न सन्देहः।

प्रणयवतीचम्पूकाव्यमिमं संस्कृतपरिषत् पक्षतः प्रकाशयितुम् अङ्गीकृतवते महाकवये डा के सुधाकर राव् महाशयाय अपि च काव्यस्यास्य समीक्षणं कृतवद्भ्यः डा. वेदान्तं कुमारस्वामिवर्येभ्यः प्रणामाञ्जलिं वितरामि।

विविधानां काव्यानां, शास्त्रग्रन्थानां, शोधप्रबन्धानां च संशोधने प्रकाशने च संस्कृतपरिषदम् इमां सततं प्रोत्साहयन्ति, सर्वविधं सहायं वितरन्ति केन्द्रीय-संस्कृत-विश्वविद्यालयस्य उपकुलपतिवर्याः विबुधाः आचार्याः श्रीनिवास वर्खेडि महाशयाः अपि च कुलसचिवाः आचार्याः रञ्जित् कुमार बर्मन् महाशयाः, एतेभ्यः सप्रश्रयं धन्यवादान् वितरामि। एवमेवात्र

In Public domain. Digitization Muthulakshmi Research Academy

उस्मानिया विश्वविद्यालयस्य उपकुलपतिवर्याः राजनीतिशास्त्रपारीणाः आचार्याः डि रवीन्दर् महाशयाः, कुलसचिवाः आचार्य पि लक्ष्मीनारायण महाशयाः अस्मान् सर्वथा प्रेरयन्ति। एतेभ्यः धन्यवादान् वितरामि। अपि च केन्द्रीय संस्कृतविश्वविद्यालये आदर्शसंस्थानां निदेशकाय युवविपश्चिते आचार्याय गायत्रीमुरलीकृष्णाय कृतज्ञतां निवेदयामि।

अस्माकं संस्कृत परिषदः उपनिदेशकाभ्यां निरन्तराध्ययनाध्यापन-रताभ्यां डा वि सुब्रह्मण्यः, डा के वरलक्ष्मी इत्येताभ्यां, शोधसहायकाभ्यां के वि सूर्यप्रकाश-जोशी सन्तोषकुमाराभ्यां, युवविदुषे जोशी भरद्वाजाय, अन्येभ्यः सर्वेभ्यः परिषत् सदस्येभ्यः शुभाभिनन्दनानि वितरामि। कार्यदीक्षापटूनामेतेषां निरन्तरपरिश्रमेणैव सर्वं सुसाध्यं भवतीत्यत्र न सन्देहः।

काव्यस्यास्य मुद्रणं Karshak Art Printers समुचितरीत्या कृतवन्तः। तेभ्यः संस्कृत धन्यवादान् प्रकटयामि।

बुधजनविधेयः

आचार्यः के. नीलकण्ठः

निदेशकः, संस्कृत अकाडमी, हैदराबाद्

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

संस्कृतभाषायां परः सहस्राणि चम्पूकाव्यानि सन्ति। गद्यपद्यमिश्रितं काव्यमेव चम्पूकाव्यमित्यभिधीयते। प्रणयवतीचम्पूकाव्ये इतिवृत्तं काल्पनिकम्। पञ्चोल्लासाः सन्ति। एकैकस्मिन् उल्लासे सप्तचत्वारिंशत् श्लोकाः सन्ति। पञ्चमोल्लासे अष्टचत्वारिंशत् श्लोकाः आहत्य २३६ श्लोकाः वर्तन्ते। काव्ये प्रधानरसः शृङ्गारः। विप्रलम्भ, संयोगशृङ्गारयोः वर्णनं श्लोकेषु दरीदृश्यते। प्रणयवतीचम्पूकाव्यमामूल-चूडमवलोक्य 'समीक्षा' रूपेण गुणदोषप्रकाण्डकविपण्डितविमर्शनपूर्वकं स्वाभिप्रायं प्रकटितवद्भ्यो तल्लजेभ्यः सहृदयवतंसेभ्यो डा. वी. ए. कुमारस्वामी महोदयेभ्यः कार्तज्ञमाविष्करोमि । तथैव अस्य चम्पूकाव्यस्य प्रकाशनं कृतवद्भ्यः संस्कृत परिषदः निदेशकेभ्यः आचार्य नीलकण्ठमहोदयेभ्यः सादरं सप्रश्रयं धन्यवादशतं समर्पयामि ।

डा. के सुधाकररावः
रचयिता

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

कथासंग्रहः

श्रीकरः एकः विप्रः। हिमाद्रौ रामालयस्य अर्चकः। अस्य मन्त्रगुरुः मधूकमहर्षिः। मधूकमहर्षिप्रदत्तमन्त्रं जपित्वा अयं रञ्जिनी नाम्नीम् अप्सरसं प्रत्यक्षीचकार । तया सह विवाहः अपि संपन्नः। दम्पती सुभृशं सुरतक्रीडामग्नौ अभवताम्। श्रीकरः पुत्रीयति स्म। इन्द्रसन्देशप्राप्तिसमनन्तरं रञ्जिनी नृत्यं कर्तुं त्रिविष्टपं अगच्छत्। स्वर्गे नृत्यं कृत्वा भृशं सम्मानिता रञ्जिनी उपहारैः साकं गृहमागच्छत्। तयोः दाम्पत्यसुखानुभवः अचलत्। मधूकमहर्षेः सकाशात् पुत्रप्राप्तिमन्त्रं प्राप्या मन्त्रसाधनानिरतोऽभवत् श्रीकरः नवरात्रदिनेषु। रञ्जिनी गर्भं दधार । स्वप्ने चन्द्रं स्वोदरे प्रविशन्तमपश्यत्। तद्वृत्तान्तं सर्वमपि श्रीकरम् अकथयत्। ततश्च कस्मिंश्चन शुभदिवसे पुत्रोदयः अभवत्। मधूकः गुरुरागत्य रक्षां अददात् शिशवे। बाल्यलीलावर्णनं तृतीयोल्लासे दृश्यते।

पुनः स्वर्गे मदनोत्सवः अचलत्। इन्द्राज्ञया रञ्जिनी स्वर्गं ययौ। विरहतापं सोढुं अशक्तः श्रीकरः यक्ष्मरोगग्रस्तोऽभवत्। धात्री गङ्गा तस्य सेवामकरोत्। स्वर्गादागता रञ्जिनी रोगग्रस्तं पतिं दृष्ट्वा रुरोद।

पञ्चसोल्लासे मधूकमहर्षिः आगत्य रञ्जिन्याः गृहे धन्वन्तरिहोममकारयत्। तस्मै दक्षिणां अददात् रञ्जिनी। त्रिविष्टपात् धन्वन्तरिः आगत्य रञ्जिनीं असान्त्वयत्। दिव्यौषधं अददात्। दिवसत्रये श्रीकरः स्वस्थः सञ्जातः। मधूकगुरुः श्रीकराय मालां अददात् धारणार्थम्। प्रवर्धितः तत्पुत्रः चन्द्रः शास्त्राध्ययनमकरोत्। संस्कृताध्यापकोऽभवत्। यौवने चन्द्रस्य श्रीकरतनयस्य तारया सह विवाहः अभवत्। चन्द्रः भार्यया सह दाम्पत्यसुखमन्वभवत्। चन्द्रस्य पुत्रोदयः अभवत्। तस्य नाम मन्मथः। सपरिवारा रञ्जिनी स्वर्गं गत्वा, तत्र वसन्तोत्सवे नृत्यमकरोत्। तदनन्तरं हिमालयमागच्छत्। अपरेद्युः इन्द्रः आगत्य तस्यै भृङ्गारमालाम् अददात्। सा आतिथ्येन तमतोषयत्। इन्द्रस्यस्वर्गम्प्रति निष्क्रमणानन्तरं श्रीकरः पुत्रपौत्रयुतः सुखं जिजीव हिमालये विश्वकर्मनिर्मिते सुन्दरभवने।

In Public domain. Digitization Muthulakshmi Research Academy

एवं कथा पूर्णा। काल्पनिकम् इतिवृत्तं स्वीकृत्य मया "प्रणयवतीचम्पूः" काव्यं रचितम्। गुणदोषादिविषये सहृदयाः एव प्रमाणमित्यलमतिप्रपञ्चेन ।

डॉ. के. सुधाकर रावः
रचयिता

In Public domain. Digitization Muthulakshmi Research Academy

Sree Ganapatisatchidananda Prashastigrahita
Bharatitirthahamsaka
Bhaktikavitamattakokila
Scholar Poet of B.T.L.P. Samsthanam, Hyderabad
Dr. V.A. KUMARASWAMI M.A., PhD.,
(A.K.S. VEDANTAM)
Rtd. Principal, K.V. CRPF, Hyderabad - 500 005
Ph.: 80196 93260 / 95151 18574

श्रीः

KUNCHAVARAMU, Via NANDIVELUGU
GUNTUR Dist. - 522 306
Andhra Pradesh
Ph. 99639 23769
3-122/4, Plot-37, R-3,
Ashoknagar Colony Road,
Opp. Uppal Depot,
Hyderabad - 92.

समीक्षा

अस्माकं मान्यप्रियसुहृद्वरः डा. के. सुधाकररावुमहोदयः बहुभाषाकोविदः मदीयसाहित्यरचनाव्यासङ्गे भागभाक् च चकास्ति। तथा हि अनेन महोदयेन मत्प्रणीतस्य बस्तविलापस्य मेकसन्देश नामान्तरस्य तेलुगु पद्यानामनुवादं संस्कृतश्लोकैः व्यदधात्। मत्प्रणीतस्य तुलनात्मकसरलसंस्कृत व्याकरणस्य च हिन्दी भाषायामनुवादमकरोत्।

अस्य महाभागस्य इतःपूर्वमपि कतिपयसंस्कृतरचनानां वाङ्मुखं मया दत्तमासीत्। इदमतिनवीनं कल्पनामयमधुना प्रणयवतीचम्पूप्रबन्धं शतोत्तरग्रन्थानां प्रप्रथमं भवति। जीवन् भद्राणि पश्यतीति सूक्तिं सार्थयता मया अस्या नवीनकृतेः समीक्षा क्रियते।

कीर्तिशेषैः ओगोटि परीक्षित् शर्मभिः क्रिस्ताब्दे १९८९ तमे पत्रिकाभाषारूपं व्यावहारिकव्याहाराकारं भारतभारत्याः (सुरवाण्याः) दर्शयितुमुपक्रमः कृतः। ततः परं श्री च.मू. कृष्णशास्त्रि महाशयेन संस्कृतप्रचाराय मार्किं पञ्चाशत् वर्षैः यः प्रारम्भः कृतः तस्य प्रभावेनांग्लपदान्यपि संस्कृत अकाडमीत्यादीनि स्वेच्छया निर्भीकैः प्रचारकैः उपयुज्यन्ते। नात्र दोषं वयमुत्पश्यामः कालस्य गतिरीदृशी। अपि च देशीयभाषापदानि प्राचीनसंस्कृतग्रन्थेषु सन्तीति अस्माभिः बोद्धव्यम्। उदाहरणानि न दीयन्ते विस्तरभयात्। तथा च यथा तेलुगुभाषायां तत्समतद्भवदेशीया देशीयरूपैः चतुर्विधानि पदानि अभिज्ञायन्ते तथा संस्कृतनवीनव्याकरणे तादृशप्रस्तावः आनेतव्यः। एतदभिप्रेत्य मेकसन्देशकाव्ये भरोसां विना इति पदप्रयोगः अस्मभ्यं रोचते। किं च वयं

In Public domain. Digitization Muthulakshmi Research Academy
जानीमः यत् कीर्तिशेषेण महाकविना विजयसारथि महामनीषिणा मन्दाकिनीनाम्नि मात्राच्छन्दोमयकाव्ये क्रिस्तुशके १९९८ तमे आगमात् तन्त्रग्रन्थेभ्यश्चानीतानि नवीनपदानि अस्मादृशैः अल्पज्ञैः अप्रयुक्तदोषदूषितानीति न वक्तव्यानि। तत्र तत्समतद्भवविभागकल्पना आवश्यकी भवत्येव।

सति चास्मिन् सन्दर्भे प्रकृतमनुसरन्तो वयं प्रणयवतीचम्पूकाव्ये अप्सराशब्द एकवचने आकारान्त आनीत इति विदित्वा दोषदृष्टिं न वहामः। ईदृशानि स्खलितानीति दुर्बुध्या विक्षेपं मनसो न जनयामः। अस्य च उपष्टम्भनं कुर्मः यतो हि अमरकोशे सुधाव्याख्याने सकारान्ताः सर्वे अकारान्ता भवन्ति इति प्रोक्तम्। पति शब्दस्य सखिशब्दस्य तुल्यत्वमापादितं पाणिनिना क्लेशकरं जातमिति मन्यामहे। "सीतायाः पतये नमः" "पतिना नीयमानायाः पुरश्शुक्रो न दोषभाक्" इति च प्रयोगौ स्मरणीयौ। एवमेव शिखि शब्दः इकारान्तः कल्पितः हरिशब्दवत् प्रणयवतीचम्पूकाव्ये नास्मानुद्वेजयति। क्र, प्र, ब्र, ह्व" इति चतुर्णां सन्निधानं पुर्वाक्षरस्य गुरुत्वं न जनयतीति अस्मिन् भारतभारतीव्याहारप्रणयिनः युवानः विदां कुर्वन्तु।

सन्दर्भशुद्धये जवाहरलालनेहरुप्रोतं च न विस्मरतु इति संस्कृतज्ञान् ज्ञापयामः भारतीया भूतकाले एवं जीवन्ति भूतकालयमाणानुरोधन स्वं पापपङ्गग्रस्तं मन्वानाः खियन्ति इति। तथा च इतिहासभाषाया उद्धारः कर्तव्यः पाणिनीयानुरोधेनैव जीवितव्यमिति राद्धान्तं च भञ्जयन्तु भञ्जनं च जायमानं विदां कुर्वन्तु।

अस्तु, दम्पत्योः मनोहरं प्रणयं वर्णयता सुधाकररावमहोदयेन सहृदयास्सर्वे समाह्लादिता इत्यत्र नास्ति संशयः। अद्भुतरसस्य च पोषणं श्रृङ्गारपरिपोषायात्र सम्यक्कृतमिति भृशं मोमुद्यामहे। अत्र हि हिमालयवर्णनम् स्वर्णवर्णनम् इत्यादिभिः साकं मधूकमहर्षेः प्रख्यापनमतसुन्दरं शोभते। मन्त्राणां महत्वप्रदर्शनं नाकस्य हिमालयपरिसरतपोभूमेश्चानुसन्धानं

In Public domain. Digitization Muthulakshmi Research Academy

सुमनोमनोरञ्जकं चकास्ति। ध्यानस्य प्राधान्यं विश्वकर्मणा भवनस्य निर्माणं देवीस्तवनं चित्रलेखनम् इत्यादीनि प्रकरणानि श्लाघापात्रतां गतानि। धन्वन्तरिसमागमः अन्यत्र दुर्लभः अदृष्टचरः अत्र लभ्यते।

बालकस्य कृते मातुरुपदेशः सुचारुरूपः विलसति। होमकार्यक्रमः नवार्णमन्त्रविषयश्च ग्रन्थप्रणेतुः वैदिकवासनां स्फोरयतः। बालस्य चन्द्रस्य शास्त्राध्ययनं संस्कृताध्यापकत्वं च पठित्वा सुप्रसन्नं भवत्यस्मादृशानां चेतः।

विक्रमोर्वशीयनाटकं नाके प्रदश्यते इति कल्पना, चम्पूकाव्यप्रणेतुः कालिदासे प्रीतिं व्यञ्जयाति, औचित्यं चावहति। चन्द्रः गर्भं विशन् वीक्षितः अन्तर्वल्या इति च वचनं कादम्बरीकथां स्मास्यति। कादम्बर्यनन्तरं कल्पितकथा ईदृशी मनोरमा नान्या इति मन्यामहे। चम्काव्येषु अन्यदुर्लभं स्थानं प्रणयवती चम्पूकाव्यमधिरोढुमर्हतीति चास्माकमभिप्रायः।

काव्ये भावपक्षः विदुषां चेतांसि भृशमानन्दयति। रचयितुः पूर्वजन्मनि अस्मिंश्च पुण्यसंस्कारः अनुत्तमः इति चम्पूकाव्यमिदं दृढीकरोति।

प्रणयश्च दम्पत्योः न केवलं कामपरिपूर्तिकरः अपि तु पुत्रपौत्रसम्पादनक्षमम्मन् सफलदाता भवतीति सन्देशमिदं चम्पूकाव्यं ध्वनिमार्गेणास्मान् ज्ञापयति। सर्वधा सर्वदा अन्योऽयं कविवरः अनल्पकल्पनाधुरीणः इत्यमेयामोदमेदुरा वयं प्रकटयामः।

एवंवादी
भगवदीयः
वि.ए. कुमारस्वामी

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूचिका

क्र.सं	विषयः	पु.सं
1.	प्रस्तावना	i
2.	प्राक्कथनम्	v
3.	कथासङ्ग्रहः	vii
4.	समीक्षा	ix
5.	प्रथमोल्लासः	1
6.	द्वितीयोल्लासः	10
7.	तृतीयोल्लासः	20
8.	चतुर्थोल्लासः	29
9.	पञ्चमोल्लासः	37

In Public domain. Digitization Muthulakshmi Research Academy

प्रणयवतीचम्पूः

In Public domain. Digitization Muthulakshmi Research Academy

प्रणयवतीचम्पूः

प्रथमोल्लासः

प्रार्थना

1. श्रीशं स्निग्धकटाक्षनिर्जितवधूचित्ताम्बुजातं विभुम्
कँसाद्युत्कटदुष्टमर्दनकळानैपुण्यगण्यं गुरुम् ।
तं कैवल्यपदप्रदं सुरुचिरं वंशीनिनादोज्वलम्
वन्दे कृष्णमनन्तवैभवयुतं नीलाम्बुदश्यामलम् ।।

2. सरस्वतीं महाराज्ञीं वेदविद्यास्वरूपिणीम् ।
श्वेतवस्त्रावृतां वन्दे वाणीं वीणाक्वणाङ्कितम् ।।

कथाप्रारम्भः

हिमालयवर्णनम्

3. हिमालयो भारतभूमिभागे चकास्ति नूनं मुनिवासयोग्यः ।
निरन्तरं वेदनिनादपूर्णो निलिम्पसङ्घैःपरिवेष्टितःसन् ।।

4. जलप्रपातेषु निलिम्पकन्याः नितान्तमभ्यङ्गनमाचरन्ति ।
तत्पादमञ्जीरनिनादपूर्णो श्रीमान् हिमाद्रिः सुभृशं चकास्ति ।।

5. घण्टानिनादोऽपि लयान्वितस्सन् संश्रूयते सुन्दरमन्दिरेषु ।
उत्सारयन् दुष्टगणान्निलिम्पानामन्त्रयत्येव सगौरवं तान् ।।

6. आकर्षिताः सौरभयुक्तपुष्पैः कुर्वन्ति नादं भ्रमराःनितान्तम् ।
ध्याने रतानां श्रवणान्तरेषु ॐकारनादं सुमनोहरं च ।।

7. दृष्ट्वा शिखीनां विशदं च नृत्यम् शृङ्गारभावैः परिपीड्यमानाः ।
प्रियाः स्मरन्त्येव सुदूरसंस्थाः स्मराम्बकैर्विक्षतयक्षवर्याः ।।

In Public domain. Digitization Muthulakshmi Research Academy

8. गजाः करेणूः समुपेत्य स्थिता
स्रवन्मदाम्भःकणभासिगात्राः ।
कण्डूयने स्पर्शसुखानुभूतिम्
संप्राप्य घीङ्कारपराः भवन्ति ।।

9. मृगीं निजाङ्के च निधाय प्रेम्णा
लिलेख जिह्वाग्रतलेन गात्रम् ।
ऋतौ वसन्ते खलु कृष्णसारः
ललास राज्ञीयुतभूपतुल्यः ।।

मधूकमहर्षिः

10. कदम्बवृक्षस्य समीपभूमौ
तपः क्रियाप्राप्तमहाबलोऽसौ।
रराज काषायधरो महर्षिः
सुदीर्घकूर्चश्च मधूकनामा ।।

हिमाचले अभिरामगुणाकरः श्रीकरः नवयुवकः महोत्साहभरितः मधूकमुनेः शिष्योत्तमः श्रीरामालये अर्चकत्वेन जीवनं यापयति । श्रीकरः विनयविनम्रः सन् स्वगुरोः पादाम्बुजयुग्मतले मल्लिकाकुसुमानि विकीर्य मनसि भक्तिभावं धरीधरन् साष्टाङ्गं प्रणनाम । शिष्यस्पर्शनेन उन्मीलितनेत्रः तपःपूतदिव्यगात्रः उदीयमान भानुप्रभातुल्याननप्रभः श्रीकरं ददर्श मधूकः । अप्सरावशीकरणसाधनासु निरतः श्रीकरः गुरोः सकाशात् रञ्जनीनाम्नीं अप्सरां वशीकर्तुं मन्त्रमवाप । निष्ठागरिष्ठो भूत्वा मन्त्रजपं कुरुष्व, अभीष्टसिद्धिरस्तु इति मधूकस्तस्मै शुभाशीर्वादं ददौ ।

श्रीकरस्य तपश्चर्या

11. जितेन्द्रियो रम्यतटाकतीरे
मृगाजिने श्रीकरनामधेयः ।
जजाप मन्त्रं स गुरुप्रदत्तम्
निलिम्पकन्यां परिणेतुकामः ।।

In Public domain. Digitization Muthulakshmi Research Academy

12. रञ्जिन्याः मञ्जुलं चित्रं
संस्थाप्य कुसुमादिभिः ।
आनर्च श्रीकरो भक्त्या
स्थिरचित्तः सुगन्धिलः ।।

फलाहारःसन् तारकाकान्तिमण्डिताकाशस्य विधुविराजितस्य अधस्तात् निशीथवेलायां स्नातः कृतसुगन्धद्रव्यलेपनः सुन्दरवस्त्रधारी सन् सौन्दर्याकरः श्रीकरः गुरुपूजादिकं कृत्वा तदनन्तरं देवकन्याप्राप्त्यर्थं दिव्यमन्त्रं जपति स्म । प्रथमेऽहनि अनिर्वचनीयः सुगन्धः प्रवहति स्म । द्वितीयेऽहनि तस्य उपरि पुष्पवृष्टिरभवत् । तृतीयेऽहनि काऽपि सुन्दरी तस्य जानुद्वयसमीपमागत्य उपविष्टा किमपि सम्भाषते स्म । किन्तु निश्शब्दनिशीथवेलायां मौनव्रतधारी सः मन्त्रं जजाप । प्रतिदिनप्राप्तदिव्यानुभवः सः तपश्चकार । एकविंशतितमे दिने अप्सरा रञ्जिनी नाम्नी तत्र आजगाम ।

अप्सरायाः प्रत्यक्षीकरणम्

13. भृङ्गारवर्णां सुविशालनेत्रीम्
भृङ्गोरुकेशामरूणाधरोष्ठीम् ।
शृङ्गारमूर्तिं स ददर्श देवीम्
तुङ्गस्तनद्वन्द्वमनोहरां ताम् ।।

14. ददर्श नाकौकनिवासिनीं ताम्
निलिम्पकन्यां सुकुमारगात्रीम् ।
स्मितप्रभाभिर्दशदिक्प्रदेशान्
प्रकाशयन्तीं च तडिल्लताभाम् ।।

15. अक्षमालां विहायासौ श्रीकरो देवकन्यकाम् ।
रञ्जिनीं सुन्दरीं वीक्ष्य जगाद वचनं मुदा ।।

In Public domain. Digitization Muthulakshmi Research Academy

16. धन्योऽहं तव दर्शनेन नितरामानन्दपूर्णोऽभवम् ।
सौन्दर्यं भवदीयमद्भुतमहो ! स्वर्लोककन्ये ! मुदा
मां सन्तर्पय नृत्यवाद्यततिभिः शृङ्गारगीतोक्तिभिः
जाया मे भव शोभने सुमधुरं स्याज्जीवनं मोहनम् ।।

17. इत्युक्त्वा श्रीकरः पौष्पीं
मालां तस्याः गळे मुदा ।
चिक्षेप सौरभयुताम्
हस्तौ जग्राह तत्क्षणे ।।

18. श्रीकरस्य च कण्ठे वै
पुष्पमालां न्यधात्तदा ।
समुद्रादुत्थिता लक्ष्मी
रिव कन्या ललास सा ।।

19. दृष्ट्वा तं श्रीकरं दिव्या
रञ्जिनी वाक्यमब्रवीत् ।
कान्त्या रदनपङ्क्तीनां
भासयन्ती दिशो दश ।।

20. वशीकृताऽहं भवता नितान्तं
समागता स्वर्गतलादिदानीम् ।
आजीवनं ते च कळत्रभावं
धृत्वा गृहे वै निवसामि नूनम् ।।

21. रत्नानि दिव्याभरणानि नित्यम्
दास्यामि ते श्रीकर ! भोजनं च ।
दिव्याम्बराण्युज्वलवर्णयुक्ता-
न्यहर्निशं सुन्दरलेपनानि ।।

In Public domain. Digitization Muthulakshmi Research Academy

22. धनं प्रभूतं मणिमुद्रिकादीन्
ददामि ते श्रीकर ! दिव्यशक्तिं ।
बलं लसद्यौवनसुन्दरत्वम्
विनाशयाम्यद्य जडत्वभावम् ।।

23.* सदा समागमे रता भवामि मन्मथोपम ।
रतीव ते निरन्तरं स्मरामि मानसान्तरे
निशीथकालसेवनं करोमि चुम्बनं मुहुः
रतोत्सवो महोत्सवो सुरोत्सवो हि जीवने ।।

रञ्जिनीश्रीकरयोः उद्वाहः

कतिपयदिनानन्तरं तयोः कल्याणमपि वैभवसहितं संपन्नम् रामालये । गुरुः मधूकमहर्षिरागत्य वेदमन्त्रोच्चारणपूर्वकं शुभाशीर्वादं ददौ। विवाहं द्रष्टुमागताः सर्वेऽप्यतिथिगणाः रञ्जिन्याः सौन्दर्यं दृष्ट्वा विस्मिताः बभूवुः । षड्रसोपेतभोजनं घृतसूपशाकमिष्टान्नसहितं स्वीकृत्य चूतफलरसं पीत्वा, सुगन्धद्रव्यभरितं ताम्बूलं स्वीकृत्य सर्वे जनाः परमहर्षनिर्भराः सञ्जाताः । ललन्तिकादिभिः दिव्यकनकाभरणैरनेकैः समलङ्कृता सुरूचिरया मेखलया भूषिता रञ्जिनी सकलजनानां दृष्टिपथमाचकर्ष । पट्टवस्त्रधारी सन्तोषभरान्तरङ्गरङ्गन्मदनतरङ्गः रात्रिः कदा भविष्यतीति प्रतीक्षमाणः श्रीकरः कटाक्षवीक्षणैस्तां सुन्दरीं मुहुर्मुहुर्वीक्षते स्म । दिनत्रयानन्तरम् प्रथमरात्रौ)

सुरतक्रीडा

24. तौ दम्पती -
सुरतखेलनतत्परतां गतौ
मुदुलचुम्बनकार्यरतौ मुदा ।
मदनबाणशतैः परिपीडितौ
सरसवाक्यमिथःसुखदायकौ।।

* शालिनी वृत्तम् (ज - र - ल - ग)

Digitized by eGangotri Digitization Muthulakshmi Research Academy

25. चलितवस्त्रमकारणभूषितम्
सततदोर्युगबन्धनसंयुतम् ।
कृतनखक्षतमद्भुतसीत्कृतम्
रतमभूच्च तयोःसुखदायकम् ।।

26. स्खलितमेखलमुच्छ्वसितोज्वलम्
गलितवस्त्रमपास्तविभूषणम् ।
पृथुनितम्बचलद्रदनक्षतम्
रतमहो ! सरसं पुलकाङ्कितम् ।।

27. चौशीतिबन्धैः सुरतं निशायां
मुदावहं घर्मजलाभिषिक्तम् ।
व्रीडामतिक्रम्य बभूव नव्यम्
परस्पराश्लेषयुतं धरण्याम् ।।

28. श्रान्तौ नितान्तं सुरतान्तवेला
परस्पराश्लिष्टशरीरयुग्मौ।
तौ जग्मतुः गाढसुषुप्तिभावम्
वधूवरौ प्रेमरसानुविद्धौ।।

29. प्रातः स्नातो सरलहृदयः स्वस्थले पूजनं च ।
कृत्वा शीघ्रं कुसुमसहितः श्रीकरो रामपूजाम्
कर्तुं यातः पवनगमनः मन्दिरं सुन्दरं वै
सीताजानिं निगमनुतिभिः पूजयामास भक्त्या ।।

30. श्रीकरो गृहमागत्य रञ्जिनीमालिलिङ्ग वै।
कपोलस्पर्शनं कुर्वन् मधुरं वाक्यमब्रवीत् ।।

31. पिपासार्तस्य सलिलं महानन्दकरं यथा ।
तथा त्वत्साहचर्यं मे प्रिये ! सौख्यप्रदायकम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

32. नित्यं चन्दनलेपनं भुवि वियोगार्तस्य ते सङ्गमः
आश्लेषः पुलकाङ्कुरो वपुषि मे विम्बाधराडम्बरः
दिव्यः काममहोत्सवःसपदि ते संभाषणं सुन्दरम्
त्वं मे कल्पलतोपमा भवसि हे कल्याणि ! वाञ्छाप्रदे !

श्रीकरस्य पुत्रकामना

33. तनयमृदुलगात्रस्पर्शनं कर्तुमीहे
जलजनयनयुग्मे ! मानसे मेऽस्ति चिन्ता ।
कथय रहसि नूनं चिन्तितं किं त्वयाऽद्य?
मदनकुसुमबाणैःपीडितस्ताडितोऽहम् ।।

34. पुन्नामनरकात् त्रातुं समर्थस्तनयो भवेत् ।
तन्मे मनोरथरथं सञ्चालयितुमर्हसि ।।

35. तस्य तद्वचनं श्रुत्वा रञ्जिनी स्मितपूर्वकम् ।
उवाच वाक्यं मधुरं परमानन्ददायकम् ।।

36. तपस्यया तेऽस्मि वशीकृताऽहम्
त्रिविष्टपाद् भूमितलेऽवतीर्णा ।
मनोरथं पूरयितुं समर्था
अवेहि मां कल्पलतासमानाम् ।।

तदाकर्ण्य परमानन्दभरितः श्रीकरस्तां प्रगाढपरिष्वङ्गे बबन्ध । शीतलमलयानिलचलित स्तनांशुकां तां दृष्ट्वा तस्याः हृदयतले न्यस्तशिरोभागः तस्थौ। तयोर्मध्ये कालः संस्तम्भितो बभूव । तौ किञ्चित् फलाहारं स्वीकृत्य रजन्याः आगमनार्थं निरीक्षमाणौ अभवताम् । नभसि चन्द्रः शीतलकिरणसान्द्रः श्वेतप्रभाभिः सकललोके ज्योत्स्नां रुपानलं प्रसारयितुमारेभे ।

In Public Domain. Digitization Muthulakshmi Research Academy

37. सुरतसुखरतौ दम्पती प्रेमपूर्णौ
मदनकुसुमबाणैःपीडिताङ्गौ निशायाम् ।
सरसमधुरबन्धैरैक्यभावं प्रपन्नौ
रहसि सदनमध्ये चक्रतुः सौख्यपानम् ।।

38. एकान्ते किलिकिञ्चितैश्च मणितैर्नानाविधैःसीत्कृतैः
आश्लेषैस्तिलतण्डुलादिभिरहो ! दन्तक्षतैः सुन्दरैः ।
हर्षोत्कर्षमवाप्य कामकदनं तौ चक्रतुर्दम्पती
पुत्रेच्छां हृदये निधाय नितरामानन्दभावानुगौ।।

रञ्जिन्याः स्वर्गलोकगमनम्

कतिपयदिनानन्तरं विमानमेकं इंद्रप्रेषितं श्रीकरस्य सदनसमीपे अवततार । कोऽपि दूतः समागत्य अमृतमयानि फलानि, पट्टवस्त्राणि अमूल्याभरणानि च रञ्जन्यै ददौ। आतिथ्यस्वीकारानन्तरं इन्द्रसभायां नृत्योत्सवे नर्तनं कर्तव्यमिति पाकशासनस्य सन्देशं सःदूतः श्रावयामास । नवोढां तां त्यक्तुमसमर्थोऽपि इन्द्राज्ञां परिपालयन् श्रीकरः रञ्जिनीं स्वर्गं प्रेषयितुमुद्युक्तोऽभवत् । सा रञ्जिनी अपि कतिपयवस्त्रयुतां मञ्जूषां स्वीकृत्य विमानमारुरोह । मासाभ्यन्तरे आगच्छामीति उक्तवती । शुभ्रतरे अभ्रमार्गे उड्डीयमानं विमानं अचिरादेव त्रिविष्टपं ययौ।

39. प्रियावियोगात्परितप्यमानः
महोग्रतापानलतप्तगात्रः ।
मनोव्यथाभारविवर्णवक्त्रः
नावाप निद्रामपि नायकोऽयम् ।।

40. स्मरन् प्रियायाः सुमनोज्ञरूपम्
मुखं सुधांशोः प्रतिविम्बतुल्यम् ।
बिम्बाधरं भूरिनितम्बभागम्
शान्तिं न लेभे हृदि श्रीकराख्यः ।।

In Public domain. Digitization Muthulakshmi Research Academy

41. लिलेप गात्रं मृदुचन्दनं सः
जलप्रपातेषु कृताभिषेकः ।
सुगन्धपुष्पास्तरणे शयानः
चकार यत्नं विरहोपशान्त्यै।।

42. इयेष पातुं न जलं कदाऽऽपि
फलादिकं नैव चखाद, शून्ये ।
क्षिपन् स्वदृक्पातमतीव खिन्नो
कलावशेषोडुपतिर्यथाभूत् ।।

43. गुरुर्महर्षिश्च मधूकनामा
ययौ तदा शिश्यवरस्य गेहम् ।
कृशाङ्गमानन्दविहीननेत्रम्
जगाद दृष्ट्वा वचनं विविक्तम् ।।

44. अवैमि खिन्नं च प्रियावियोगात्
किमर्थमन्नं सलिलं न सेव्यते ।
शरीररक्षार्थमवश्यमेतत्
फलानि वा भक्षय शिष्य तूर्णम् ।।

45. इत्युक्त्वा स गुरुस्तस्मै ददौ चूतफलानि वै।
दत्वातिथ्यं स गुरवे स्वीचकार फलादिकम् ।।

मधूकमहर्षिः श्रीकरं कृशगात्रं चिन्ताक्रान्तं च वीक्ष्य सान्त्वनपूर्वकं वचनमब्रवीत् -

46. संयोगो विप्रयोगश्च मर्त्याणां सहजौ खलु ।
चित्ते ते खिन्नता मास्तु ध्यानं त्वं कर्तुमर्हसि ।।

47. कृत्वा तस्मै शक्तिपातं भ्रूमध्ये श्रीकराय सः ।
गुरूःस्वीयाश्रमं यातो मधूकाख्यो महामुनिः ।।

इति सुधाकरकृते प्रणयवतीचम्पूकाव्ये प्रथमोल्लासः

In Public domain. Digitization Muthulakshmi Research Academy

प्रणयवतीचम्पूः

द्वितीयोल्लासः

स्वर्गलोकवर्णनम्

1. त्रिविष्टपं सौरभपुष्पपूर्णम्
झरीसरःसुन्दरमत्युदात्तम् ।
अभ्रंकषैर्हर्म्यचयैर्विचित्रैः
शोभायमानं च चकास्ति दिव्यम् ।।

2. निकेतनानामुपरि स्थितानि
लसन्ति नाके झषकेतनानि ।
महानिलौद्धत्यवशाच्चलानि
आकारयन्तीव सुमाम्बकं तम् ।।

3. रथ्यासु भृङ्गाररथावलीनां
सञ्चारवेगेन समीकृतैश्च ।
रजःकणैर्धूसरितं महाभ्रं
महाम्बुदैश्छन्नमिवावतस्थे ।।

4. गजावलीनां समलङ्कृतानां
निरन्तरं सञ्चरणेन नूनं ।
मदाम्बुनापूरितमार्गयुक्तम्
त्रिविष्टपं शात्रवदुर्गमं तत् ।।

5. मनोजवेनोच्चलितेषु सत्सु
रथस्थितेष्वश्वचयेषु नाकः ।
हेषारवैः श्रीहयवक्त्रदेव
साम्राज्यतुल्यो विरराज नूनम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

6. प्रोड्डीयमानैरतिवेगयुक्तैः
विमानकैरभ्रमहाङ्गणेषु ।
नाको महाशब्दयुतो ललास
गरुत्मतः शौर्यपुरीव दिव्यम् ।।

7. यक्षाङ्गनानामतिसुन्दरीणां
रत्नापणे दर्पणशोभिबिम्बैः ।
मञ्जीरनादैः मधुरैश्च नाकः
हर्म्यायमाणो हि बभूव लक्ष्म्याः ।।

8. अट्टालकेष्वद्भुतसुन्दरीणां
स्रस्तायमानेषु कुचांशुकेषु ।
शृङ्गारभावोऽपि भृशं प्रवृद्धः
ग्रीष्मेऽमराणां पथगामिनां च ।।

9. चम्पकाशोकपुन्नागकदम्बप्रमुखाः सदा ।
वृक्षाःस्वर्गे फलन्त्येव सततं कुसुमान्विताः ।।

10. उद्यानकेष्वाम्रतरोः समीपे
शाखोपविष्टाश्च पिकाः नितान्तम् ।
कूजन्ति सुश्राव्यगळेन नित्यं
आमन्त्रयन्तीव वसन्तमारात् ।।

In Public domain. Digitization Muthulakshmi Research Academy

14. प्रवर्तन नर्तनमाद्वितीयम्
गुणैरनेकैश्च विभूषिता त्वम् ।
स्तोत्रं त्वदीयं न करोमि सत्यम्
हेम्नः सुगन्धोऽपि तनोति शोभाम् ।।

15. श्रीविश्वकर्माऽपि विनूत्नमेकम्
हर्म्यं हिमाद्रौ कमनीयमुच्चम् ।
निर्मापयिष्यत्यतिशीघ्रगत्या
लोके प्रसिद्धं सदनं त्वदीयम् ।।

16. तच्छ्रुत्वा वचनं दिव्यं
सहस्राक्षस्य निर्जराः ।
पारिजातसुमैः वृष्टिम्
चक्रुस्तस्यै प्रहर्षिताः ।।

17. देवदुन्दुभिनादोऽपि कृतो गन्धर्वसत्तमैः ।
स्मिताननाऽभवन्नूनं रञ्जिनी मूकविस्मिता ।।

18. वास्तुशिल्पानल्पविद्याकल्पनाचतुरस्तदा ।
विश्वकर्मा स्वीचकार आदेशं स शचीपतेः ।।

19. दिनैः कतिपयैरेव हर्म्यमेकं विनिर्मितम् ।
हिमाद्रौ श्रीकरस्यार्थे सुन्दरं विश्वकर्मणा ।।

In Public domain. Digitization Muthulakshmi Research Academy
तत्र पाकशासनः कनकरत्नभयमकुटधारी सन् अमरावत्यां देवसभायाः आध्यक्ष्यं चकार । स्वीयासनेषु एकत्र वल्कलधारिणः जटामण्डिताः मुनयः, अन्यत्र अग्निः, वरुणः, कुबेरः, यमः इत्यादिदेवाः, अन्यस्यां पङ्क्तौ यक्षाः किन्नराः, किम्पुरुषाः, अन्यत्र सुरसुन्दर्यः, उपविष्टाः । स्वर्गाधिपतेरिन्द्रस्य भाषणं प्रवृत्तम् । राक्षसेभ्यः स्वर्गस्य परिरक्षणार्थं किं किं कर्तव्यमिति महेन्द्रः सविवरं जगाद । सभायां उन्नतासनेषु स्वस्वलोकात् समागताः त्रिमूर्तयः स्वस्वजायासमेताः तत्र उपविष्टाः । विक्रमोर्वशीयनाटकस्य प्रदर्शनं सञ्जातम् । गायकैः संस्कृते मधुरगीतानि आलापितानि । सर्वत्र हर्षोल्लासः । ललनाननेषु परमानन्दः । रसिकजनान्तरङ्गयवनिकासु शृङ्गारभावतरङ्गाः प्रादुर्भूताः बभूवुः । मासपर्यन्तं प्रतिदिनं तत्र महान् कोलाहलः । रञ्जिन्याः नृत्यकार्यक्रमः अद्भुतः आसीत् । सर्वे देवाः करतालपूर्वकं तस्याः भूरिप्रशंसां चक्रुः । भरतनाट्यप्रवीणा रञ्जनी अद्भुतहावभावप्रदर्शनं कृतवती । सभायां तस्याः हस्ते स्वर्णमुद्रिकां निक्षिप्य पारिजातकसुममालया, स्वर्णनाणकैश्च सम्मान्य, इन्द्रः अवोचत् -

11. शृङ्गारभावं च प्रदर्शयन्त्या
त्वया कृतं नर्तनमद्वितीयम् ।
स्वर्गेऽमराणां स्तुतिपात्रमासीत्
धन्याऽसि हे रञ्जिनि ! ते शुभं स्यात् ।।

12. वशिष्ठमुख्याः ऋषयोऽपि वीक्ष्य
हृष्टा बभूवुः पुलकाङ्कुरैश्च ।
अपारमैश्वर्यमखण्डमायुः
स्थैर्यं समाप्नोषि निलिम्पकन्ये ! ।।

13. स्वर्गे च मर्त्ये भवदीयकीर्तिः
व्याप्नोति सर्वत्र लताङ्गि ! दिव्ये ।
चन्द्रस्या ज्योत्स्नाकिरणप्रसारः
आह्लादयत्येव नरान् निलिम्पान् ।।

In Public domain. Digitization Muthulakshmi Research Academy

रञ्जिन्या गृहागमनम्

नृत्योत्सवानन्तरं रञ्जिनी सविनयं इन्द्रादिभ्यो नमस्कृत्य तेषामाशीर्वचनं संप्राप्य अत्यन्तसन्तुष्टान्तरङ्गा विमानमारुह्य हिमाद्रौ स्वगृहं आजगाम। श्रीकरोऽपि स्वप्रियतमां जायां दृष्ट्वा अत्यन्तहर्षपुलकितः गाढं आलिलिङ्ग। इन्द्रेण विश्वकर्मणे दत्तमादेशं, पुष्पवृष्टिवृत्तान्तं सर्वमपि तस्मै सविवरं निवेदयामास अप्सरा रञ्जिनी। कतिपयदिनेषु श्रीकरस्य नूतनं हर्म्यं आविरभूत्। सुन्दरयवनिकाभिः विभिन्नप्रदेशगतैः मुकुरनिकरैः देवतागृहे स्थापितैः अंगुष्ठप्रमाणैर्देवतामूर्तिभिः सुन्दरतल्पैः आस्तरणैः कुड्यलिखितरम्यचित्रकलाद्योतकचित्रैः विचित्रैः राजप्रासादायमानं हर्म्यं दृष्ट्वा श्रीकरः विस्मितोऽभूत्। शुभे मुहूर्ते ग्रहेषु सर्वेषु शुभस्थानगतेषु सत्सु श्रीकरः पत्नीसमेतःसन् नूतनं सदनं प्रविवेश। श्रीरामचन्द्रपूजां चकार। बान्धवाः निमन्त्रिताः। बान्धवाः निमन्त्रिताः भोजनं चक्रुः।

दाम्पत्यविलासः

20. निशीथवेलासु जलेजनेत्री
रतीव सौन्दर्ययुता ललास।
तया सरस्तीरविहारलीलां
चकार भर्ता स्मरसूनविद्धः॥

21. मुहुर्मुहुर्वीक्षणजातकामौ
परस्पराश्लेषनिबद्धगात्रौ।
ताम्बूलरक्ताधरयुग्मयुक्तौ
तौ चक्रतुर्मान्मथयुद्धकेळिम्॥

22. सिक्तं महाघर्मजलेन नक्तम्
रक्तं कपोलद्वयमेव सक्तम्।
तच्चुम्बनैः कालगतिर्निरुद्धा
कामोत्सवः हर्षकरो बभूव॥

In Public Domain. Digitization Muthulakshmi Research Academy

23. अधरपानरतैकविलालताम्
मधुरचुम्बनकार्यविलीनताम् ।
सुरतखेलनभावविशालताम्
सपदि जग्मतुरेव सुमत्तताम् ।।

24. सुरतखेलनतत्परमानसः
प्रियतमां भुजबन्धनसंस्थिताम् ।
न स मुमोच च निर्जरकन्यकाम्
उदयभानुसमागमनेऽपि ताम् ।।

25. मदनतुल्यमवेक्ष्य पतिं मुदा
अलसगात्रमचञ्चलदीक्षया ।
उपरतिं च चकार सुराङ्गना
स्मरशरैःसुतरां परिपीडिता ।।

26. नभसि हेममयं च दिवाकरम्
सपदि वीक्ष्य धृतोज्वलशाटिका ।
पतिकपोलतले मृदुचुम्बनम्
कृतवती ललना स्मितभूषिता ।।

27. गवाक्षरन्ध्रात् स्वकरैः पतङ्गः
प्रबोधयामास तमर्चकं द्राक् ।
उन्मीलयन् नेत्रयुगं कराभ्यां
प्रोत्थाय सःस्नानगृहं जगाम ।।

28. स्नातानुलिप्ताऽप्सरकन्यका सा
पूजागृहे दाशरथिं समर्च्य ।
दिव्यं प्रसादं पतिहस्तमध्ये
संस्थापयमास सुगन्धपूर्णम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

29. गत्वाऽऽलयं श्रीकरभूसुरोऽपि
आनर्च रामं कुसुमैः विचित्रैः ।
घण्टानिनादेन समन्त्रकं तं
सीताविभुं लक्ष्मणवत्सलं च ।।

गुरुदर्शनम्

30. पुण्याश्रमं शीतनगे जगाम
सःश्रीकरो देशिकदर्शनार्थम् ।
समागतं शिष्यवतंसमेन
मुवाच वाक्यं स मुनिर्मधूकः ।।

31. पुत्रोदयार्थं हिमभूधरस्थां
समर्चय त्वं जगदीश्वरीं ताम् ।
गङ्गोदकैर्वैदिकमन्त्रयुग्मैः
कृताभिषेकां सकलार्थदात्रीम् ।।

32. पुराकृतानेककुकर्मभिस्ते
सुतस्य लाभस्तु सुदुर्लभःस्यात् ।
तथापि देव्याः कृपया असाध्यम्
किमस्ति लोके वद श्रीकार्य?

33. नवार्णमन्त्रस्य जपं कुरुष्व
मनोरथस्ते सफलीकृतःस्यात् ।
मातुःकृपाप्राप्तिफलस्वरुपः
शीघ्रं सुतो ते भविता मनोज्ञः ।।

In Public domain. Digitization Muthulakshmi Research Academy

34. इत्युक्त्वा स मधूकोऽपि
दिव्यमन्त्रं ददौ मुदा ।
नत्वा गुरुं श्रीकराख्यो
भव्यहर्म्यं ययौ तदा ।।

मन्त्रसाधना

नवरात्रसमये नवदिनपर्यन्तं अरुणवस्त्रधारी सन् निशीथकाले जगज्जनन्याः नवार्णमन्त्रजपं चकार श्रीकरः । गुरूक्तरीत्या देव्याः मन्दिरे प्रातःकाले क्षीराभिषेकं चकार । नवमे दिने दशांशहोमं चकार । तदनन्तरं गृहे एव देवीविग्रहस्य पुरतः स्तोत्रं चकार श्रीकरः ।

देवीस्तुतिः

35. अखण्डभूमण्डलपालकास्ते
आखण्डलाद्याः सुरसत्तमाश्च ।
त्वदीयपूजानिरताः भवन्ति
साम्राज्ञि ! मातः प्रणमामि तुभ्यम् ।।

36. चण्डप्रचण्डानसुरांश्च हंसि !
शूलेन हे देवि ! कृशानुतुल्या ।
सर्वं महाकिल्बिषतूलराशिम्
दग्धं करोष्येव दयाप्रपूर्णे ! ।।

37. रसातले नागगणैर्महोग्रैः
प्रपूजिता मर्त्यगणैर्धरित्र्याम् ।
धर्मार्थकामादिवरान् ददासि
श्रीमातृके त्वां प्रणमामि नित्यम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

38. लोके द्वयं देवि ! चकास्ति दिव्यम्
पुण्यप्रदं वाञ्छितपूरकं मे ।
गुरोःकृपा कारणवर्जिता सा
त्वदङ्घ्रियुग्मे दृढभक्तिभावः ।।

39. नाकाङ्गनां प्राप्य प्रियां नितान्तम्
धन्यं मदीयं खलु जीवनं हे ।
सर्वेशि ! पुत्रोदयभाग्ययुक्तम्
मां त्वं विधेह्यम्बुजतुल्यनेत्रि ! ।।

40. हर्म्ये निवासः खलु सौख्यपूर्णः
चीनाम्बराणामपि नास्ति लोपः ।
स्वर्णं धनं धान्यचयं समृद्धम्
श्रीदेवि ! युष्मच्चरणं प्रपन्नः ।।

41. इतीरयन् भक्तिरसान्तरङ्गः
प्रपूज्य देवीं शुभदां महेशीम् ।
समर्पयामास फलानि तस्यै
अभीष्टसिद्ध्यर्थमतन्द्रितः सन् ।।

42. परस्परप्रेमरसानुभूतिम्
हृदन्तराळे विनिवेशयन्तौ।
बभूवतुस्तौ हिमशैलहर्म्ये
नितान्तमानन्दरसैकमग्नौ।।

43. अपत्यभाग्याय निरीक्षमाणौ
परस्पराह्लादमयान्तरङ्गौ।
बभूवतुस्तौ मधुरानुरागौ
निरन्तरं पूजनतत्परौ च ।।

In Public domain. Digitization Muthulakshmi Research Academy

44. तदाऽप्सरा दिव्यशिशोश्च चित्रम्
विलेखितुं चित्रकलाप्रवीणान् ।
निमंत्रयामास महोत्सुका वै
समागतास्तद् गृहसीम्नि शीघ्रम् ।।

45. दृष्ट्वा च तान् चित्रकलाप्रवीणान्
निलिम्पकन्याऽपि जगाद वाक्यम् ।
दीव्यच्छिशोः चित्रशतं भवद्भिः
विलेखितव्यं खलु शीघ्रगत्या ।।

46. हर्म्यात् बहिर्विष्टरकेषु नित्यम्
उद्यानभूमौ च कलाप्रवीणाः ।
आदाय वर्णानि सुखोपविष्टाः
सर्वे हसन्तो लिलिखुश्च चित्रम् ।।

47. चित्राणि सर्वाणि मनोहराणि
क्रीत्वा महाहर्षयुता बभूव ।
स्वर्णं धनं वस्त्रचयं ददौ सा
तेभ्यः प्रभूतं त्रिदशाम्बुजाक्षी ।।

इति सुधाकरकृते प्रणयवतीचम्पूकाव्ये द्वितीयोल्लासः

In Public domain. Digitization Muthulakshmi Research Academy

प्रणयवतीचम्पूः

तृतीयोल्लासः

सा रञ्जिनी श्रीकरस्य जाया -

1. चित्राणि सर्वाणि मनोहराणि
दीव्यच्छिशूनां निजरम्यहर्म्ये ।
कुड्येषु संस्थाप्य ददर्श प्रेम्णा
बिम्बं स्मरन्ती निजचित्तपद्मे ।।

2. चित्राणि संवीक्ष्य मनोहराणि
हृष्टस्स पप्रच्छ सरोजनेत्रीम् ।
कुड्येषु चित्राणि लसन्ति नूनम्
त्वं ब्रूहि किं कारणमस्य देवि ! ।।

3. श्रुत्वा तद्वचनं भर्तुः
रञ्जिनी सा पतिव्रता ।
उवाच सुन्दरं वाक्यं
हसन्ती हर्षपूरिता ।।

4. पुनःपुनर्दर्शनकार्यहेतोः
चित्राणि कुड्येषु लसन्ति श्रीमन् ।
अनेन तद्दिव्यशिशोश्च बिम्बम्
मच्चित्तपीठे स्थिरतामुपैति ।।

5. निशम्य तस्याः वचनं युवत्याः
जगाद वाक्यं महनीयमूर्तिः ।
तथास्तु त्वद्गर्भतले च पुत्रो
जनिष्यतीत्येव हि तर्कयामि ।।

In Public domain. Digitization Muthulakshmi Research Academy

6. आकर्ण्य तद्वाक्यमतीव हृष्टा
सा रञ्जिनी वाक्यमुवाच दिव्यम् ।
श्रीमन् ! शुभं कामयता त्वयाऽहम्
लब्धानुरागाऽस्मि नितान्तमद्य ।।

रञ्जिन्याः गर्भधारणम्

7. दाम्पत्यमाधुर्यफलस्वरूपम्
दधार गर्भं सुरलोकनारी ।
वार्तां समाकर्ण्य भृशं ननर्त
पतिः हिमाद्रौ मुदितान्तरङ्गः ।।

8. गतेषु मासेषु विवर्धमानम्
गर्भं महौन्नत्यमवाप तूर्णम् ।
करेण पस्पर्श तदीयकुक्षिम्
हर्षोत्कटः श्रीकरभूनिलिम्पः ।।

स्वप्ने चन्द्रदर्शनम्

9. कुक्षौ प्रविष्टं परिपूर्णचन्द्रम्
ददर्श सुप्तौ प्रमदाऽद्वितीया ।
ब्राह्ममुहूर्तेऽद्भुतकान्तिपूर्णम्
तुतोष नूनं विकचाब्जनेत्री ।।

10. शुभस्वप्नस्य वार्तां च समाकर्ण्य पतिस्तदा ।
ननर्त हृष्टचित्तस्सन् श्रीकरः संयतेन्द्रियः ।।

पुत्रोदयः

11. नवमासेषु पूर्णेषु रञ्जिनी हरिणेक्षणा ।
सुषुवे सुन्दरं पुत्रं पुण्डरीकायतेक्षणम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

12. दृष्ट्वा अलौकिकं पुत्रं स्मितपूर्णाननं तदा ।
तुतोष श्रीकरो दिव्यं वंशोद्धरणकारणम् ।।

13. गतेषु मासेषु प्रवर्धमानः
शिशुर्बलिष्ठः स्मितशोभितास्यः ।
स्वकान्तिभिः दिव्यतमो ललास
नभोगतः पूर्णसुधाकराभः ।।

14. चलन् पतन् क्रीडनकैश्च खेलन्
रुदन् स्वपन् जानुयुगेन रिङ्गन् ।
रजः कणैर्दूषितगात्रकोऽपि
रराज पूर्णेन्दुसमानकान्तिः ।।

15. महानसं याति स भाण्डमेकम्
निपात्य दुग्धेन विलिप्तगात्रः
जहास दृष्ट्वा जननीं प्रकोपाम्
करद्वयास्फालनमेव कुर्वन् ।।

16. मासत्रयानन्तरं सः श्रीकरो शिशवेऽकरोत् ।
शुभवारे तथा नामकरणं च यथाविधि ।।

17. आह्लादकत्वात् बालस्य दम्पती हर्षपूरितौ।
चक्रतुर्नामकरणं चन्द्र इत्येव सार्थकम् ।।

18. स्वर्णसूत्रं नितम्बे च बबन्ध श्रीकरो मुदा ।
बालस्य चन्द्राभिधस्य समेतो भार्यया तदा ।।

In Public domain. Digitization Muthulakshmi Research Academy

नामकरणावसरे श्रीकरः स्ववन्धुगणं मित्रगणं चाह्वायामास । सुवर्णडोलायां स्थितं नानाभरणभूषितं देवतुल्यं चन्द्रं अन्वर्थनामधेयं च दृष्ट्वा सर्वेऽपि बान्धवाः, सन्तुष्टाः नितराम् । षड्रसोपेतभोजनेन सर्वेऽपि परमानन्दं प्राप्तवन्तः । ब्राह्मणेभ्यः वस्त्रभूषणसुवर्णदानं चकार श्रीकरः धर्मपत्नीसमेतः । अत्रान्तरे पिङ्गलजटाधारी दिव्यतेजोयुतमुखारविन्दः मधूकमहर्षिः आगतवान् । गुरुं अर्घ्यपाद्यादिभिः संपूज्य समुचितासने श्रीकरः उपावेशयत् । तस्मै वस्त्रं दक्षिणां च ददौ सपत्नीकः ।

19. बालस्य दक्षिणे हस्ते
रक्षासूत्रं बबन्ध सः ।
गुरुर्मधूकनामाऽसौ
ग्रहदोषनिवारकरम् ॥

20. गुरुर्मधूकः सकलागमज्ञः
त्रिकालसन्ध्यासमुपासकश्च ।
दृष्ट्वा प्रियं शिष्यमतीव हृष्टो
वाक्यं मनोज्ञं स जगाद दिव्यम् ॥

21. देव्याःप्रसादाच्च तवाऽऽत्मजोऽयम्
सर्वागमज्ञो निगमप्रवीणः ।
क्षोण्यां महापण्डितभाग्ययुक्तो
नूनं भविष्यत्यमलात्मकीर्तिः ॥

22. चन्द्रः सदा काव्यकलाप्रवीणः
धन्यो भवान्याः कृपया धरण्याम् ।
विख्यातनामा भविता कुशाग्र
बुद्धिः प्रवीणः पदगुम्फनेषु ॥

In Public domain. Digitization Muthulakshmi Research Academy

23. प्रतिभाकौमुदीं लोके
विकिरन् सार्थको भवेत् ।
चन्द्रः चन्द्रसमः, किन्तु
निष्कळङ्को भविष्यति ।।

24. धन्यं करिष्यति कुलं भवदीयनाम्ना
लोके प्रसिद्धमपि बालक एव धीमान् ।
देवीकृपामृतलवैः परिपूरितानां
किं दुर्लभं भवति कारणजन्मनां च ।।

मधूकस्य निर्गमनम्

25. इत्युक्त्वा सुतरां प्रहर्षभरितः श्रीमान् मधूको मुनिः
दत्वाशीर्वचनं शिशोः शुभकरं यातः स्वकीयाश्रमम् ।
दृष्ट्वा निर्जरसुन्दरीं प्रियतमामानन्दसन्धायिनीम्
हृष्टः श्रीकर इत्युवाच वचनं नैपुण्यसम्भूषितम् ।।

26. कृपया जानकीजानेः रामचन्द्रस्य चावयोः ।
चन्द्रो जातः रम्यशिशुः परमानन्दकारकः ।।

27. जगज्जनन्याः कृपयाऽऽत्मजो वै
जातः प्रिये ! वंशविवर्धनः सन् ।
धन्यं मदीयं खलु जीवनं हे
रञ्जिन्यहो ! सुन्दरमद्वितीयम् ।।

28. नेत्रे विशाले वदनं प्रफुल्लम्
ओष्ठाधरौ बिम्बफलायमानौ ।
स्वप्ने सुधांशोः तव दर्शनेन
जातः सुतोऽयं खलु पूर्णचन्द्रः ।।

In Public domain. Digitization Muthulakshmi Research Academy

29. तस्य तद्वचनं श्रुत्वा
रञ्जिनी वाक्यमब्रवीत् ।
सत्यमुक्तं हि भवता
सन्तुष्टाऽस्मि प्रियंवद ! ।।

30. तपः क्रियायास्तव कर्कशायाः
फलं हि देव्याः करुणोत्थितं सत् ।
पुत्रोदयः सर्वशुभप्रदः स्यात्
लोके गृहस्थाश्रमवासिनां वै।।

31. श्रुत्वा तस्याश्च भणितं
श्रीकरो हृष्टमानसः ।
बभूव, तां स्वबाहुभ्या
मालिलिङ्ग दृढं तदा ।।

32. पूजयामासतुर्देवीम्
गेहे भक्तियुतौ चिरम् ।
गन्धपुष्पाक्षतैः भक्त्या
तत्प्रसादाभिकांक्षिणौ ।।

बाल्यलीलाः

33. उद्यानभूमौ मृगशावकैः सः
खेलन् महानन्दयुतो बभूव ।
कृष्णायते सद्मनि पूर्णकुम्भात्
हैयङ्गवीनं च हरन् कदापि ।।

In Public domain. Digitization Muthulakshmi Research Academy

34. गृहे स्थितं तं डमरुं गृहीत्वा
करेण सव्येन करोति शब्दम् ।
शूलं गृहीत्वा मृगशाबमेकम्
गृह्णाति चन्द्रो गिरिशायमाणः ।।

35. बालिकाभिः महोद्याने
क्रीडन् धावन् हसन् मुदा ।
व्रजाङ्गनावेष्टितस्य
धत्ते कृष्णस्य चोपमाम् ।।

36. हस्तेन बालान् व्यथितानकार्षीत्
क्रीडाविवादेषु भृशं चुकोप ।
वेत्रेण तं ताडयितुं स्वमात्रा
अन्वेष्यमाणः स ययौ सुदूरम् ।।

37. स कन्दुकक्रीडनतत्परः सन्
प्रयाति दूरं पवमानवेगः ।
क्रीडाविनोदेषु च मित्रबृन्दैः
तारावृतश्चन्द्रसमो बभूव ।।

38. चूतं समारुह्य फलानि चित्वा
अश्नात्यनेकानि, रसं गृहीत्वा ।
मित्राळिवक्त्रेषु लिलेप तूर्णम्
धैर्येण हास्यार्थमतन्द्रितः सन् ।।

39. सरोवरे वारितरङ्गमध्ये
निमज्जयन् मित्रगणं स चन्द्रः ।
संप्रार्थितः प्राणभयेन तूर्णम्
उत्थापयत्येव करेण सर्वान् ।।

In Public domain. Digitization Muthulakshmi Research Academy

40. विचित्रकार्याणि करोति नित्यम्
हेलां वहन् मित्रवरा नविध्यत् ।
पुनर्दयावानचिरेण मित्र
प्रीत्या स चन्द्रोऽपि रराज नूनम् ।।

सुताय सत्प्रवर्तनोपदेशः

41. दृष्ट्वा सुतस्यापि विचेष्टितानि
तूष्णीं स्थिता साऽमरलोकभामा ।
भूमीसुरस्तं सुतमाजुहाव
प्रीत्याऽब्रवीद् वाक्यमजातशत्रुः ।।

42 क्रीडाविनोदो वरणीय एव
न मेऽस्ति चिन्ता सुत ! किन्तु बालान् ।
सन्तापयस्यद्य सरोवरेषु
नैतत्वया कार्यमितःपरं वै।।

43. न ताडनं त्वं कुरु वञ्चनम् वा
न चौर्यमन्येषु च हीनभावम् ।
क्रीडाविनोदे कलहोऽपि वर्ज्यः
मैत्रीं सदा पालय चन्द्र ! नूनम् ।।

44. पत्युक्तवचनं श्रुत्वा
रञ्जिनी सुतरञ्जिनी ।
वात्सल्यभावसम्पूर्णा
मधुरं वाक्यमब्रवीत् ।।

In Public domain. Digitization Muthulakshmi Research Academy

रञ्जिनी उवाच

45. सुखप्रदं ते वचनं यदुक्तम्
त्वदीयपित्रा सुत ! पालयस्व ! ।।
नो चेज्जनैस्साकमहर्निशं वै
युद्धं भवेद् वादविवादयुक्तम् ।।

46. मातुःसमाकर्ण्य सुतोऽपि वाक्यम्
समब्रवीत् तौ पितरौ प्रणम्य ।
युद्धादिकं नैव करोमि मातः
न वञ्चनं चौर्यमपीह नैव ! ।।

47. तच्छ्रुत्वा वचनं तस्य
विनम्रस्य सुतस्य च ।
परमानन्दमग्नौ तौ
पितरौ संबभूवतुः ।।

इति सुधाकरकृते प्रणयवतीचम्पूकाव्ये तृतीयोल्लासः

In Public domain. Digitization Muthulakshmi Research Academy

प्रणयवतीचम्पूः

चतुर्थोल्लासः

अक्षराभ्यासः

1. सततखेलनकार्यरतं सुतम्
विनयभावनया कृतवर्तनम् ।
परमतुष्टिकरं समवेक्ष्य तौ
सुखयुतौ मुदितौ पितरौ भृशम् ।।

2. आत्मजस्याक्षराभ्यासं
कारयामास श्रीकरः ।
रामालये शुभे काले
शुभनक्षत्रसंयुते ।।

3. मात्रा प्रोक्तान् स्तोत्रमन्त्रान्
श्लोकान् सर्वान् शृणोति सः ।
प्रयत्नं कुरुते प्रोक्तुं
चन्द्रः सद्मनि प्रत्यहम् ।।

4. चापल्यं निर्गतं दृष्ट्वा
सन्तुष्टौ तौ बभूवतुः ।
गृहं क्रीडनकैःपूर्णम्
चक्रतुः पितरौ मुदा ।।

5. प्रभाते गगने दृष्टं विमानं नूतनं तदा ।
इन्द्रसन्देश इत्येव चिन्तयामास रञ्जिनी ।।

6. विमानात् दूतिकायुक्ता धात्री गङ्गाभिधा तदा ।
अवतीर्य महाहर्म्यं प्रविवेश स्मिताननना ।।

In Public domain. Digitization Muthulakshmi Research Academy

7. इन्द्रलोकादागतां तां धात्रीं गङ्गाभिधां मुदा ।
निमन्त्रयामास देवी रञ्जिनी हर्षपूरिता ।।

8. नमस्कृत्याब्रवीत् धात्री उपविष्टा महासने ।
अहं स्वर्गाधिपतिना प्रेषिता देवि ! साम्प्रतम् ।।

9. मन्मथोत्सववेलायां नर्तनं कर्तुमर्हसि ।
त्रिंशद्दिनानां पर्यन्तं सभायां त्वं त्रिविष्टपे ।।

10. इत्युक्त्वा दिव्यपुष्पाणां फलानां च करण्डकम् ।
रञ्जिन्यै सा ददौ दिव्यं सहस्राक्षेण प्रेषितम् ।।

तदाकर्ण्य रञ्जिनी दरहासं कुर्वती पारिजातपुष्पाणि कानिचन स्ववेण्यां अलंकुर्वाणा अवोचत् - ''गङ्गे ! मम पुत्रः इदानीं वर्षत्रयवयाः । मम स्वर्गगमनेन का अस्य कृते दुग्धं दास्यति? । महानसे खाद्यपदार्थपाचनम् का करिष्यति ? इति चिन्तयन्त्या दोदूयते मे मनः । तदाकर्ण्य तस्याः वचनं, सस्मितं व्याजहार धात्री गङ्गा - ''देवि ! चिन्ता मास्तु ! तव आत्मजस्य स्तन्यपानाय, रक्षणार्थं च इन्देण भगवता दूती इयं प्रेषिता । अस्याः नाम यमुना । इयं पाचनकार्ये प्रवीणा । अनया साकं अहमपि भवत्याः आगमनपर्यन्तं अत्रैव स्थास्यामि'' इति । श्रीकरः रामालयादागतः मन्मथोत्सववार्तां समाकर्ण्य चिन्तितोऽभवत् । धात्रीं, दूतिकां यमुनां च दृष्ट्वा श्रीकरः चिन्तामुक्तो बभूव । श्वः प्रातःकाले गच्छामि इति जगाद सा रञ्जिनी । विमानं तु श्रीकरस्य गृहात् बहुदूरे स्थापितमासीत् । अपरेद्युः पूजादिकं कृत्वा, वालकमुत्थाप्य, तत्कपोले चुम्बनं कृत्वा, श्रीकरं समालिलिङ्ग । अश्रुपूर्णां तां मा रोदीः प्रयाणसमये इति सान्त्वयामास श्रीकरः । विमानमारुह्य रञ्जिनी त्रिविष्टपं ययौ।

मदनोत्सवः त्रिविष्टपे

11 रत्नसिंहासनारूढाः चतुर्मुखमुखास्तदा ।
निर्जराःदयितायुक्ताः पश्यन्ति स्म स्मरोत्सवम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

12. गन्धर्वसङ्गीतरवानुसारम्
दिव्याङ्गनाः नर्तनमाचरन्त्यः ।
ॐकारदिव्याकृतिकुड्यवेद्याम्
शृङ्गारभावं स्म प्रदर्शयन्ति ।।

13. दर्शं दर्शं रञ्जिनी भव्यनाट्यम्
स्मारं स्मारं भावसौन्दर्यदीप्तिम् ।
सर्वे देवाः रञ्जिताः पारिजातैः
चक्रुःनूनं पुष्पवृष्टिं समग्राम् ।।

14. अक्ष्णां सहस्रेण ददर्श नृत्यम्
शचीपतिः हर्षभृतान्तरङ्गः ।
दृष्ट्वाऽमलां निर्जरसुन्दरीं तां
उवाच वाक्यं मधुरं सभायाम् ।।

15. मुदाऽहं वदाम्यत्र देवाभिरामे
सभामध्यभागे विनूत्नं विचित्रम् ।
मनोरञ्जकं मञ्जुलं वीतखेदम्
महानर्तनम् सुन्दरं भव्यमासीत् ।।

16. अहो ! भावगाम्भीर्यमत्यद्भुतं वै
सुराणां नराणां जनानां मुनीनाम् ।
विरिञ्चादयस्ते स्तुतिं रम्यशब्दैः
मुदा साम्प्रतं देवि ! कुर्वन्ति नूनम् ।।

17. पताकादिमुद्राः त्वया दर्शिताः हे
महानर्तकि! त्वत्पदद्वन्द्वमेव ।
मृदङ्गक्वणानां वहत्यानुगुण्यम्
मुखं देवि ! शृङ्गारभावैः प्रफुल्लम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

18. न मत्सन्निधाने च शब्दाः भवन्ति
त्वदीयं महानर्तनं शेषनागः ।
न दक्षोऽस्ति वै वर्णनं कर्तुमद्य
महानन्ददं मान्मथं नृत्यमासीत् ।।

19. इत्युक्त्वा स सहस्राक्षः
सहस्रैः स्वर्णनाणकैः ।
दिव्यैराभरणैः कान्तां
सम्मानमकरोन्मुदा ।।

20. पट्टवस्त्रादिकं लब्ध्वा
रञ्जिनी हर्षपूरिता ।
चक्रे नमस्कृतिं तस्मै
नाट्यभङ्गिमया तदा ।।

तदनन्तरमपि देवतानक्षत्रगणचन्द्रस्य, रसिकतासान्द्रस्य महेन्द्रस्य आज्ञां पालयन्ती पुनः एकपक्षपर्यन्तं तत्रैव तस्थौ। श्रीकराय अन्यदूतिकामाध्यमेन सन्देशं ददौ पाकशासनः ।

श्रीकरस्य विरहवेदना

21. कार्श्यं प्राप्य वियोगतापभरितः निद्राविहीनोऽभवत्
नृत्यार्थं च विनिर्गता प्रणयिनी मे रञ्जिनीति स्मरन् ।
दुःखावेशवशात् जलाशनमपि त्यक्त्वा मुहुः श्रीकरः
उत्स्वप्नायति हा प्रिये ! सुरसुखं देहीति रात्रौ भृशम् ।।

22. सन्तापस्य निवारणाय कुधरेऽसौ निझरे स्नानभाक्
सम्यक् नित्यमुषःप्रशान्तसमये ध्यानप्रयत्नातुरः ।
किञ्चिच्चञ्चलमानसे प्रियतमाञ्चद्बिम्बमावर्तयन्
शान्तिं प्राप्तुमतीव पूजनपरः चेष्टारतः श्रीकरः ।।

In Public domain. Digitization Muthulakshmi Research Academy

23. सरसवचनजालं संस्मरन् द्वारभागे
हसति चलति दूरं प्रेयसीबद्धदृष्टिः ।
लपति पठति काव्यं मेघदूतं स विप्रः
मदनकदनहेतोस्तापतप्तो बभूव ।।

24. गगने पूर्णिमायां च दृष्ट्वा पूर्णसुधाकरम् ।
वियोगतापसन्तप्तो विललाप स भूसुरः ।।

25. धात्री गङ्गाऽपि विप्रस्य
श्रीकरस्य सुदुर्दशाम् ।
दृष्ट्वा भृशं चिन्तिताऽभूत्
विषण्णवदनाम्बुजा ।।

26. चन्द्रोऽपि धात्र्यास्तनपानदक्षः
खेलन् चलन् मित्रगणैश्च कूर्दन् ।
तुष्टोऽभवत् क्रीडनकैर्विचित्रैः
चिक्रीड नित्यं मृदुहासवक्त्रः ।।

27. ज्वराभितप्तो न शशाक पातुम्
नीरं, घृतान्नं न चखाद विप्रः ।
दीनो वियोगानलतप्तचेताः
यथाकथं मौनपरस्स शिश्ये ।।

श्रीकरस्य चिकित्सा

28. वैद्यः कोऽपि समागत्य
श्रीकरायौषधं ददौ।
ज्वरतापविनाशाय
क्षीरं पेयं च प्रत्यहम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

29. यवागूसेवनं कर्तु
मादिदेश महाशयः ।
द्रव्यं स्वीकृत्य वैद्योऽपि
निष्क्रान्तः तदगृहाद् तदा ।।

30. मञ्चे नित्यं शयानः सन्
यवागूं स पपौ तदा ।
औषधं वैद्यदत्तं च
स्वीचकार महीसुरः ।।

यक्ष्मपीडितस्य सेवा

31. कासः तीव्रतरोऽभवत्प्रतिदिनं संसेवितेऽप्यौषधे
नित्यं शोणितमुद्ववाम नितरां दौर्बल्यसंपीडितः ।
दृष्ट्वा तस्य शरीरदुःस्थितिमतः चिन्तातुरैर्वैद्यकैः
उद्घुष्टं धरणीनिलिम्पविषये यक्ष्मामयोऽस्तीति वै।।

32. आयुर्वेदविधानपालनचणैर्दत्तं च दिव्यौषधम्
पथ्यं प्रोक्तमतीव भक्तिभरिता धात्री च गङ्गाभिधा ।
चक्रे भोजननीरदानमपि वै भूमीनिलिम्पाय शु
श्रूषां कायमलापनोदनमुखैःकार्यैः महासद्मनि ।।

33. रोगस्तीव्रतरोऽभवत्प्रतिदिनं हर्म्यं च तच्छोणितैः
सिक्तं मृत्युकराळवक्त्रपतितः श्रीमानसौ श्रीकरः ।
धात्री खेदविशीर्णमानसतले संचिन्तयामास किं
कर्तव्यं धरणीनिलिम्पविषये रोगं समुत्पाटितुम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

34. दूतिका यमुना नाम्नी श्रीकरस्य च दुःस्थितिम् ।
दृष्ट्वा सकरुणं नित्यं विललाप भयान्विता ।।

35. रामालयेप्यर्चकोऽन्यो चक्रे पूजां च प्रत्यहम् ।
धूपदीपादिभिः पुष्पैःफलैःपञ्चामृतैस्तथा ।।

रञ्जिन्याः पुनरागमनम्

36. आकाशे विहगोऽयमित्यपि जनास्तं मेनिरे मानसे
वायोर्वेगयुतं विलोक्य नितरां प्रोड्डीयमानं मुहुः
सर्वे श्वेतविमानयानमिति वै भूध्रे मनुष्याः विदुः
भूम्यां चक्रयुगं निधाय सुमुखं स्तब्धं विमानं तदा ।

37. विमानादवतीर्णा सा रञ्जनी नीलकुन्तला ।
शीघ्रं दूतिकया साकं प्रविवेश गृहं मुदा ।।

38. दिव्याभरणभाण्डानि वस्त्रं द्रव्यं फलानि च ।
समरक्षत् स्वनिलये यथास्थानं महोदया ।।

रञ्जिन्याः रोदनम्

39. क्षीणारोग्यनिपीडितं कृशतनुं दीनं रुदन्तं मुहुः
भर्तारं सुरसुन्दरी सपदि तं दृष्ट्वा विषण्णाऽभवत् ।
धात्र्याख्यातविषादपूर्णघटनां श्रुत्वा रुदन्ती भृशं
किं कार्यं विषमामय क्षपणकृत् कोऽस्तीति चुक्रोश सा ।।

40. दुःखाक्रोशभरोद्यदश्रुनयना सा रञ्जिनी चिन्तिता
मृत्योर्भीकरदंष्ट्रिकाचयगतं खिन्नं कृशं तं पतिम् ।
दृष्ट्वा रोदनशुष्कनेत्रयुगळं देवीं स्मरन्तं मुहुः
वाक्यं सान्त्वनपूर्वकं सुरुचिरं प्रोवाच शान्तिप्रदम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

41. मा रोदीःप्रिय ! रामभद्रकृपया शीघ्रं भवेन्मङ्गलम्
तां देवीमखिलाण्डकोटिजननीमाराधयाम्यद्भुता
कारां पूर्णदयान्तरङ्गकलितां पापौघविद्राविणीम्
भद्रां भद्रकटाक्षनिर्जितजगत्संरक्षिणीम् यक्षिणीम् ।।

42. स्वर्गादिन्द्रकृपाहेतोः सन्मानं कनकं महत् ।
अमूल्याभरणं वस्त्रं प्राप्तं नर्तनकर्मणा ।।

43. भर्तुःस्वास्थ्यं विना शून्यं जीवनं मे भविष्यति ।
सूर्ये प्राच्या विनिष्क्रान्ते अन्धकारोदयो यथा ।।

44. इदानीं दूतिकां शीघ्रं प्रेषयित्वा महाबलम् ।
धन्वंतरिं महाभागमानेष्यामि न संशयः ।।

45. धन्वन्तरेश्च कृपया यक्ष्मरोगः प्रशाम्यति ।
पुनरारोग्यभाग्यं च त्वया संप्राप्यते भुवि ।।

46. शल्यावशिष्टं त्वां दृष्ट्वा चिन्ताक्रान्ताऽभवं विभो ।
भर्तुः सौभाग्यमिच्छामि नैश्वर्यम् नैव भूषणम् ।।

47. गङ्गां धात्रीं च यमुनां दूतिकां रञ्जिनी सदा ।
विमाने प्रेषयामास सन्देशार्थं त्रिविष्टपम् ।।

इति सुधाकरकृते प्रणयवतीचम्पूकाव्ये चतुर्थोल्लासः

In Public domain. Digitization Muthulakshmi Research Academy

प्रणयवतीचम्पूः

पञ्चमोल्लासः

धन्वतरिहोमकार्यक्रमः

1. यक्ष्मरोगाकुलं शिष्यं श्रीकरं द्रष्टुमागतः ।
मधूको सद्गुरुः शीघ्रं हर्म्यं रम्यं महोन्नतम् ।।

2. शुभे मुहूर्ते मौनीन्द्रः होमं धन्वन्तरेस्तदा ।
कारयामास चान्यस्मिन् दिने भूमीसुरोत्तमैः ।।

3. स्पष्टं देवभिषङ्मन्त्रमुच्चरन्तो महीसुराः ।
चक्रुर्होमं यथाशास्त्रं श्रीकरस्वास्थ्यहेतवे ।।

4. ननाम रञ्जिनी तेभ्यः ब्राह्मणेभ्यश्च दक्षिणाम् ।
सताम्बूलं ददौ वस्त्रं कनकं च यथोचितम् ।।

5. सन्तुष्टाः ब्राह्मणाः सर्वेप्याशीर्वादं ददुस्तदा ।
तस्मै रुग्णाय खिन्नाय श्रीकराय जितेन्द्रियाः ।।

6. गतेषु विप्रेषु मुनिर्मधूकः
यज्ञप्रसादं समवापदल्पम् ।
सुखोपविष्टामवलोक्य देवीम्
शान्तिप्रदं वाक्यमुदाजहार ।।

7. विष्णुस्वरूपस्य भिषङ्मणेश्च
कृपाविशेषेण विमुक्तिमेति ।
शिष्योऽपि यक्ष्मामयशोकभावात्
सुखं चिरंजीव ! सरोजनेत्रि ! ।।

In Public domain. Digitization Muthulakshmi Research Academy

गुरवे नमस्कृत्य तस्मै वस्त्रसहितदक्षिणां दत्वा रज्जिनी प्रोक्तवती - '' हे गुरो ! तत्रभवद्भिः धन्वन्तरिहोमप्रक्रिया अत्र गृहे यथाशास्त्रमनुसृता । धन्यवादमर्पयाम्यहम् । मया सन्देशः प्रेषितः सहस्राक्षाय । अवश्यं सः धन्वन्तरिं प्रेषयत्येव इति चिन्तयामि ।'' इत्युक्त्वा मौनं दधार । शुभमस्तु ते इति उक्त्वा सः निर्जगाम मधूकः ।

धन्वन्तरेः आगमनम्

8. शचीपतेः स्वर्गपतेर्निदेशात्
समाययौ देवभिषङ्मणिस्सः ।
त्रिविष्टपात् दिव्यविमानयाने
महौषधैः पूर्णकरस्तदानीम् ।।

9. विमानचक्रभ्रमणेन नूनम्
वातावृतैर्धूळिकणैर्नितान्तम् ।
पयोदमालावृतमित्यनन्तम्
पश्यन्ति सर्वे गगनं विशालम् ।।

10. रज्जिनी स्वागतं तस्मै
व्याजहार महात्मने ।
धन्वन्तर्याख्यवैद्याय
नाकलोकनिवासिने ।।

पूजनम्

धन्वन्तरिं देववैद्यं विष्णुस्वरूपं कनकविष्टरे समुपविष्टं सा रज्जिनी अर्घ्यपाद्यादिभिः नितरां पूजयामास। तस्य पादोदकं स्वशिरसि दधार । तस्मै मिष्टान्नमधुर कदळीफलयुक्तमातिथ्यं फलरसं च ददौ। रजतमयपात्रेषु समर्पितमातिथ्यं स्वीचकार धन्वन्तरिः । सुप्रसन्नं तं दृष्ट्वा देवकन्या श्रीकरस्य पत्नी वाक्यमुवाच -

In Public domain. Digitization Muthulakshmi Research Academy

11. दुग्धाम्भोधेर्मथनसमये दिव्यपीयूषकुम्भम्
धृत्वोत्पन्नः सकलजनतारोगनिर्मूलकर्त्वम् ।
देवानामामयभयततिं नाशयस्येव तूर्णम्
विष्णुस्त्वं मे परमकरुणापूर्णचित्तोऽसि नूनम् ।।

12. यक्ष्मामयग्रस्तमतीव रुग्णम्
खिन्नं पतिं मे करुणानिधान ।
पीयूषतुल्यौषधसेवनेन
स्वस्थं सजीवं कुरु विष्णुमूर्ते ! ।।

सान्त्वनम्

13. माङ्गल्यभाग्यं परमं धरण्याम्
मृगीदृशां देव ! सुखप्रदं च ।
यक्ष्मामयाख्यग्रहणात्पतिं मे
विमोचयस्वेति निवेदयामि ।।

14. विना पतेर्यौवनमेव सर्वम्
व्यर्थं भवेन्मेषगळस्तनाभम् ।
त्रिविष्टपं शोकयुतं हि ब्रह्मन् !
ग्रीष्मेषु मोघं मरुभूमितुल्यम् ।।

15. तच्छ्रुत्वा वचनं तस्याः रञ्जिन्याः दुःखितो भृशम् ।
धन्वन्तरिः व्याजहार वाक्यं वाक्यविशारदः ।।

16. नयनयुगळमश्रुस्रावपूर्णं समीक्ष्य
जननि ! हृदयदुःखं भावयामि त्वदीयम् ।
न खलु न खलु चिन्ताक्रान्तता शोभते ते
मधुरमखिलयक्ष्मक्षेपि चूर्णं ददामि ।।

In Public domain. Digitization Muthulakshmi Research Academy

17. प्रत्यहं क्षीरपानीये चूर्णं क्षिप्त्वा च सेव्यते ।
सप्ताहे रोगनिवृत्तिः त्वत्पतेर्वै भविष्यति ।।

18. पूर्वजन्मकृतानिष्टफलरूपेण ते पतिः ।
पीडितोऽभूत् चूर्णमिदं पीयूषोपममेव हि ।।

औषधसेवनम्

19. एवमुक्त्वा ददौ तस्यै चूर्णं धन्वन्तरिर्मुदा ।
दुग्धमिश्रितचूर्णं च पाययामास रञ्जिनी ।।

20. जग्राह श्रीकरःचूर्णं प्रियादत्तं प्रहर्षितः ।
क्षीरेण मिश्रितं दिव्यं स्मरन् रामं स्वमानसे ।।

21. पट्टवस्त्रं दक्षिणां च दत्वा देवभिषङ्मणिम् ।
सन्मानयामास तदा रञ्जिनी हर्षविह्वला ।।

22. धन्वन्तरिर्ययौ स्वर्गं विमानेन भिषङ्मणिः ।
पतेः चिकित्सां कुर्वाणा रञ्जिनी निर्भयाऽभवत् ।।

23. दिनत्रयानन्तरं सः श्रीकरः स्वस्थमानसः ।
अन्नपानादिकं नित्यं जग्राह दृढनिश्चयः ।।

24. सप्ताहानन्तरं स्वस्थः श्रीकरो रामपूजनम् ।
चकार मन्दिरे स्तोत्रैर्वेदमन्त्रैर्यथाविधि ।।

25. रामालयं समागत्य मधूको तद्गुरुस्तदा ।
कण्ठधारणयोग्यां च मालां तस्मै ददौ मुदा ।।

26. दृष्ट्वा तं श्रीकरं स्वस्थं गुरुर्वचनमब्रवीत् ।
धन्वन्तरेरौषधेन स्वस्थोऽसि त्वं महामते ।।

In Public domain. Digitization Muthulakshmi Research Academy

27. मया प्रदत्तां मालां च स्फाटिकीं धारयस्व वै।
कण्ठे, रोगभयं नास्ति सर्वं मङ्गळदं भवेत् ।।

गुरुणा मालाप्रदानम्

27. गुरुप्रदत्तां मालां स ध्यात्वा रामं गळे तदा ।
दधार श्रीकरो नूनं सर्वमङ्गलदायिनीम् ।।

29. ययौ मधूकमौनीन्द्रः स्वकीयं चाश्रमं तदा ।
पूजान्ते श्रीकरस्तूर्णं जगामात्मनिकेतनम् ।।

वत्सः चन्द्रः अष्टवर्षीयो बभूव । तदा यथाशास्त्रं तस्योपनयनं कारयामास श्रीकरः । मधूकः अन्यपरिजनाः सर्वे आगत्य वटवे आशीर्वादं ददुः । षड्रसोपेतभोजनेन सर्वेऽपि विप्राः आगन्तुकाश्च सन्तुष्टाः । विप्रेभ्यः दक्षिणाद्रव्यं कनकादिकं दत्तम् । तदनन्तरं आयोजितेषु वसन्तोत्सवेषु रञ्जिनी सपरिवारा स्वर्गं गतवती । मासपर्यन्तं तत्रैव स्थित्वा पुनरागतवती । तयोर्मध्ये विप्रलम्भस्य अवकाश एव नासीत् ।

चन्द्रस्य शास्त्राध्ययनम्

30. गतेषु वर्षेषु च चन्द्रवर्यः
श्मश्रूलसद्दिव्यमुखो ललास ।
बलोद्धतो यौवनकान्तिपूर्णो
शृङ्गारभावोज्वलमानसश्च ।।

31. गुरोः सकाशे पठनं चकार
गीर्वाणवाणीं धिषणोज्ज्वलः सन् ।
तयोः सुतः सर्वसुधीवरेण्यो
चन्द्रोऽभवत् शास्त्रविशारदोऽसौ।।

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रविवाहः

मन्मथसुन्दरं संस्कृतशिक्षकं पण्डितमण्डलीवादप्रचण्डं, अखण्डप्रतिभामण्डितं दृष्ट्वा स्वसुतं चन्द्रं यौवनारुढं मञ्जरी तद्विवाहचिकीर्षया पतिं दृष्टवा जगाद । योग्यकन्यया अस्य विवाहः यथाशीघ्रं करणीयः इति । अचिरकाले तस्य कृते कन्या 'तारा' नाम्नी लब्धा । तया सह शुभे मुहूर्ते यथाविधि विवाहमहोत्सवः संपन्नः । इन्द्रादयः देवाः समागत्य आशीर्वादं नववधूवराभ्यां ददुः । कतिपयदिनानन्तरं तयोः प्रथमरात्रिः समायोजिता ।

32. वधूवरौ हर्म्यतले नितान्तम्
परस्पराश्लेषकलाप्रवीणौ।
घर्माम्बुसंसिक्तशरीरयुक्तौ
तौ चक्रतुर्मान्मथयुद्धमेव ! ।।

शृङ्गारक्रीडा

33. मदनतापमहानलपीडितौ
सुरतखेलनकार्यविशारदौ।
रदनचिह्नविराजितविग्रहौ
सततचुम्बनतत्परतायुतौ।।

34. सरसवाक्चतुरौ सुमकोमलौ
कुसुमसौरभपूरितगात्रकौ।
अतिशयोज्ज्वलरूपविराजितौ
मणितसीत्कृतशब्दपरायणौ।।

35. जलप्रपातेषु समार्द्रदेहौ
सरोवराम्भःकणशोभिगण्डौ।
परस्परप्रेमकथानुरक्तौ
वधूवरौ तौ प्रणयप्रवीणौ।।

In Public domain. Digitization Muthulakshmi Research Academy

36. हर्म्यान्तरस्थे च तटाकमध्ये
निमज्जयामास प्रियां स्वकीयाम् ।
अन्तर्जले चन्द्रपदं गृहीत्वा
भृशं वधूः साऽपि चकर्ष तारा ।।

37. दाम्पत्यसौख्याम्बुधिमग्नदेहौ
निरन्तरप्रेमरसानुविद्धौ।
दृष्ट्वा च तौ हर्षयुतान्तरङ्गौ
चकांक्षतुस्तत्पितरौ हि पौत्रम् ।।

38. दृष्ट्वा स्वजनकं पुत्रः चन्द्रो वाक्यं समब्रवीत् ।
इदानीं त्वत्स्वास्थ्यलाभात् सन्तुष्टोऽहं हिमाचले ।।

39. यक्ष्मामयः प्रणष्टोऽभूत् रामभद्रानुकम्पया ।
पौत्रलाभो यथाशीघ्रं भविष्यति न संशयः ।।

40. तच्छ्रुत्वा वचनं तस्य तुतोष श्रीकरस्तदा ।
रज्जिनी प्रत्यहं देवीमर्चयामास संस्तवैः ।।

चन्द्रस्य पुत्रोदयः

41. ग्रहेषु सर्वेषु महोन्नतेषु
शुभे मुहूर्तेऽजनि पुत्ररत्नम् ।
ताराऽपि दृष्ट्वाऽऽत्मजमद्वितीयम्
हर्षप्रकर्षेण बभूव पूर्णा ।।

42. पुत्राय तस्मै पितरौ च प्रेम्णा
तौ चक्रतुर्नाम शुभे मुहूर्ते
स मन्मथाख्योऽपि रराज नूनम्
स्मरायमाणस्मितरम्यवक्त्रः ।।

In Public domain. Digitization Muthulakshmi Research Academy

अमूल्यबाल्यलौल्यकृतलीलाविशेषैरशेषैः दृङ्मात्रेण पितरौ तर्पयन् मन्मथः सर्वजनप्रियतां लेभे । स्ववंशवर्धनं आनन्दवर्धनं पौत्रं दिनदिनप्रवर्धमानमवेक्ष्य श्रीकरः भार्यासमेतः तुतोष नितराम् । मधूकमहर्षिः आगत्य तस्मै बालकाय रक्षां सव्यहस्ते बबन्ध । चन्द्रः संस्कृतपाण्डित्यसान्द्रः महाविद्यालये बोधनं कृत्वा प्रथितकीर्तिः सुन्दरमूर्तिरभवत् । श्रीकरः इन्द्रात् निमन्त्रणे प्राप्ते सति वसन्तोत्सवं द्रष्टुं रञ्जन्या, स्नुषया तारया, चन्द्रेण, नवजातशिशुना मन्मथेन च युक्तः विमानमारुह्य स्वर्गं ययौ। रञ्जिन्याः रमणीयनृत्यदर्शनेन सर्वेऽपि निर्जराः इन्द्रादयः परमसन्तुष्टाः अभवन् । प्राप्तधनकनकवस्तुवाहनादिभिः नितरां सन्तुष्टा रञ्जिनी सपरिवारा विमानेन हिमालयं समागता ।

इन्द्रस्य आगमनम्

43. दिव्यं रत्नविमानमम्बुदपतिः शीघ्रं समारुह्य वै
धृत्वा मूर्ध्नि सुवर्णनव्यमकुटं जायासमेतःमहान् ।
रञ्जिन्याः गृहमाजगाम विविधैःभूषाविशेषैर्युतः
इन्द्रः सुन्दरपट्टवस्त्ररुचिरो वज्रायुधात्युज्ज्वलः ।।

आतिथ्यं इन्द्रस्य

44. दृष्ट्वाऽऽयान्तमभूतपूर्वधिषणापूर्णं शचीवल्लभम्
गङ्गादिव्यजलैस्तदङ्घ्रियुगळं प्रक्षाळ्य सा रञ्जिनी
देवीं तत्प्रियसुन्दरीमपि महातिथ्येन चानर्च सद्
भक्त्या निर्जरसुन्दरी विनतवाक् श्रीपूर्णचन्द्रानना ।।

45. सुरुचिरबहुखाद्यैस्तुष्टचेताः महेन्द्रः
कनकमणिविनूत्नां दिव्यमालां च दत्वा ।
परमसुखविलासैः भ्राजिषीरन् भवन्तः
इति वचनमपूर्वं प्रोक्तवान् स्वर्गनाथः ।।

In Public domain. Digitization Muthulakshmi Research Academy

46. सुवर्णमालां संप्राप्य सन्तुष्टा रञ्जिनी तदा ।
रराज स्वर्णभूषाभिः लक्ष्मीरिव विभूषिता ।।

47. गते स्वर्गं महेन्द्रे सः श्रीकरो हृष्टमानसः ।
पुत्रपौत्रगणैर्युक्तो तस्थौ वैश्रवणोपमः ।।

इति सुधाकरकृते प्रणयवतीचम्पूकाव्ये पञ्चमःउल्लासः

सम्पूर्णम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Dr. K. Sudhakar Rao was born on 1-7-1960 at Adoni of Kurnool district. A.P. He got M.A. in Telugu from S.V. University, Tirupati. He received M.A. in Sanskrit from Kuvempu University, Shimoga (Karnataka) in 2007. Ph.D. in Sanskrit was awarded to him by Karnataka University, Dharwad in 2017 for his thesis entitled 'A Critical Study of Ramabhadramba's Raghunathabhyudaya' written in Kannada.

Dr. Rao, is an eminent translator, polyglot and prolific writer. Being versatile genius, so far he has authored 52 Books in Telugu, 22 in Sanskrit, 3 in English, 18 in Kannada and 6 in Hindi. Totally he has 101 works to his credit. He has also contributed several research articles in Sanskrit. He was honoured by an award of Chanakya Samman in 2018 for his excellent contribution to literature.

Dr. Rao belongs to Indian Information Service (IIS) officer of 1987 batch, served so far in various departments under Ministry of information & Broadcasting, Government of India. He retired as Dy. Director (News) from Doordarshan, Hyderabad in June 2020.

He is a grand master in Reiki. He had initiated into Shakti Cult by Dr. Narayana Datt Sreemali of Jodhapur. Presently he resides at Ballari of Karnataka.

9789380171876